स्वर्णाकर्षणभैरवप्रयोगम्

(समस्त दरिद्रता निवारक पद्धति)

डॉ० रामप्रिय पाण्डेय

॥ श्रीः ॥

नवशक्ति ग्रन्थमाला-१४

स्वर्णाकर्षणभैरवप्रयोगम्

(समस्त द्ररिद्रता निवारण पद्धति)

लेखक एवं सम्पादक

डॉ. रामप्रियपाण्डेय

नवशक्ति प्रकाशन

चौकाघाट, वाराणसी

प्रकाशक :

नवशक्ति प्रकाशन

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)

जे० 13/24 के० चौकाघाट, वाराणसी-2

दूरभाष : 0542-2202237, 09956014704

स्वर्णाकर्षणभैरवप्रयोगम्

IBSN : 978-81-87904-22-9

प्रथम संस्करण : 2013 ई.

मूल्य : 260/-

पुस्तक प्राप्ति स्थान :

नवशक्ति प्रकाशन

बी० 31 पी० सी० एफ० प्लाजा,

मिन्ट हाउस, नदेसर, वाराणसी

दूरभाष : 0542-6444515

अक्षर विन्यास :

न्यूमाप्रॉस कम्प्यूटर्स

चौकाघाट, वाराणसी-2

मो. 08176800012

मुद्रक :

प्रभा प्रेस

चौकाघाट, वाराणसी-2

दूरभाष : 09838927095

श्रीगुरोः स्तुतिकुसुमाञ्जलिः

काश्यामुपेत्यविधिवत् तपसाबलेन, प्राप्तश्रियः सकलशास्त्रविचारदक्षान्।
अध्यापनेन सततं कृतशास्त्ररक्षान्, श्रीवायुनन्दनबुधान् प्रणमामि नित्यम्॥१॥
पूर्वं नमस्त्रिमुनिशास्त्रविचक्षणाय, साहित्यमर्मविदुषे कृतिने ततश्च।
मीमांसया दलितदुर्व्यसनाय पश्चात्, श्रीवायुनन्दन! महामतये नमस्ते॥२॥
शास्त्राण्यधीत्य बहवः कटुकैर्विवादैर्ग्रस्तान्तरास्तु समयं क्षपयन्ति नित्यम्।
श्रौतप्रभाविलसिता गुरवो मदीयाः श्रीविश्वनाथपदभक्तिजुषः किलासन्॥३॥
साहित्यशास्त्रासुरवृक्षविवर्धनेन, तस्यामृताभफलदानमनोहरेण।
सत्रेण भारतधरा किल यस्य भाति, तस्मै बृहस्पतिनिभाय नमो नमस्ते॥४॥
ये ब्रह्मवंशविभुताकलितान्तरङ्गा, आचारतश्च भृतभूरिविभूतिभङ्गाः।
गङ्गावगाहनशिवार्चनतत्परास्ते, श्रीवायुनन्दनबुधा गुरवो जयन्ति॥५॥
भस्मत्रिपुण्ड्रविलसच्छुभविग्रहाणां, विद्याविलासविगलन्मधुवाग्झराणाम्।
पाण्डेयवर्यविदुषां पदयोर्नतिर्नो, भूयादहर्निशममङ्गलनाशनाय॥६॥
काश्यां विपश्चिदतुलासु सभासु सभ्या, यत्सन्निधौविधृतमौननिभा अभूवन्।
तान् विश्वनाथपदपङ्कजभृङ्गभूतान्, श्रीवायुनन्दनगुरून् सततं स्मरामि॥७॥
जाज्वल्यमाननिजपावनविग्रहेण, लोकोत्तरेण महसा च तपोबलेन।
श्रीविश्वनाथपदमाशुगतं भवन्तं, ध्यात्वा पितः वयमहो कृतिनो भवामः॥८॥

परमपूज्यश्रीपितृचरणगुर्वर्पणमस्तु

श्रद्धासुमनाञ्जली:

साहित्योदधिमज्जितोऽतिगहनान् ग्रन्थान् समालोचयन्,
शास्त्राभ्यासपरायणः प्रतिदिनं स्वाध्यायशीलः सुधीः।
शृङ्गारादिरसैः सदार्द्रहृदयो विद्वद्वरेण्याऽग्रणीः,
वन्द्यः पण्डितवायुनन्दनकविर्विश्वेश्वरोपासकः॥१॥

रामे भक्तियुतो यथाऽमितबली वायोः सुतः कीर्तिमान्,
रामाभ्यां समधीतवाननलसः शास्त्रं तथा बुद्धिमान्।
प्राप्नोद् व्याकरणे पटुत्वमचिरं विद्योतितो ज्योतिषा,
सत्संस्कारमथाग्रहीद् द्विजकुलस्याप्यत्र बाल्ये ब्रती॥२॥

विद्याम्भोधिनिमज्जनोद्धुरमना सारस्वतः साधकः,
काशीं मुक्तिकरीमुपेत्य विदुषः कालीप्रसादादसौ।
विज्ञातुं समुपस्थितः प्रमुदितः शास्त्रार्थतत्त्वं परं,
पातुं काव्यसुधारसं च रुचिरं श्रेयस्करं दुर्लभम्॥३॥

काश्यां संस्कृतशिक्षणेऽतिनिपुणोऽयं विश्वविद्यालये,
आचार्येति प्रतिष्ठिते गुरुपदे संशोभितोऽभूदहो।
आदर्शश्च समस्तशिक्षकगणस्यादर्शयन् सुन्दरम्,
छात्राध्यापनतरः समभवद् विजयते वाणीसुतः सात्त्विकः॥४॥

श्रीवायुनन्दन-पाण्डेयं ज्ञानमार्तण्डरूपिणम्।
आचार्यप्रवरं भक्त्या भूयो भूयो नमाम्यहम्॥५॥

श्रद्धासुमनाञ्जलिः श्रीगुर्वर्पणमस्तु

सम्पादकीय

वर्तमान युग अर्थ(रुपया) प्रधान युग है। मनुष्य को जीवन जीने के लिए धन ही प्रमुख साधन है, प्रत्येक व्यक्ति को अपनी आवश्यकताओं की पूर्ति के लिए धन की ही आवश्यकता होती है, यदि उसके पास धन है तो वह अपनी समस्त भौतिक कार्यों का सम्पादन सुगमता पूर्वक कर सकता है। लेकिन मनुष्यों को अपने आवश्यकताओं की पूर्ति हेतु धनोपार्जन करने के लिए अतिशय सङ्घर्ष करना पड़ता है, बहु प्रयत्न करने पर भी आवश्यकता के अनुरूप धनोपार्जन नहीं कर पाता है। ऐसी स्थिति में उसे दैव का सहयोग आवश्यक है, बिना दैव सहयोग के जीवन सुगम और सरल नहीं हो पाता है, दैव सहयोग में भैरव की आराधना अनिवार्य है। कलयुग में भैरव की कृपा सहज ही प्राप्त हो जाती है तथा समस्त कामनाओं की पूर्ति आसानी से हो जाती है। शास्त्रों में भैरव के अनेकों भेद बताये गये हैं उनमें भी स्वर्णाकर्षण भैरव की आराधना तो धन प्राप्ति के लिए आवश्य ही करणीय है। स्वर्णाकर्षण भैरव की कृपा प्राप्त हो जाने के बाद मनुष्य के जीवन में धन सम्बन्धी आवश्यकताओं की पूर्ति सहज हो जाती है। साधक को जीवन भर कभी धन की कमी नहीं होती, उसकी समस्त कामनायें निश्चय ही पूर्ण हो जाती है। उसके आयु आरोग्य की वृद्धि होती है।

स्वर्णाकर्षणभैरवो धनधान्यप्रदायक।
भक्तानां कामसमृद्धिः आयुरारोग्यदायक॥

स्वर्णाकर्षणभैरव की उपासना से त्रैलौक्य में कोई वस्तु दुर्लभ नहीं होती, साधक इनके कृपा से असाध्य कार्य को भी सहजता से पूर्ण कर लेता है और सर्वत्र विजयी होता है।

न तस्य दुर्लभं लोके त्रिषु लोकेषु वै भवेत्।
असाध्यं साधयेन्मर्त्यः सर्वत्र विजयी भवेत्॥

स्वर्णाकर्षणभैरव की सरल उपासना पद्धति जिसका आश्रय ग्रहण करके विधि पूर्वक आराधना सहजता से किया जा सके, इसके लिए स्वर्णाकर्षणभैरवप्रयोग का लेखन किया गया, जो हमारे पितृचरण पूर्व प्रोफेसर स्व० वायुनन्दन पाण्डेय जी को समर्पित है, जिसका प्रकाशन श्रीलोकेश कृष्ण त्रिपाठी, प्रकाशक नवशक्ति प्रकाशन के द्वारा जनकल्याणार्थ किया गया। सभी जन इस प्रयोग के माध्यम से अपने जीवन को समृद्धिमय बना सकें, यही कामना है। नित्यं शुभं भवतु, कल्याणं भवतु।

श्रावण शुक्ला पञ्चमी, सम्वत् २०६९ **डॉ० रामप्रियपाण्डेयः**

भूमिका

भी धातु से औणादिक **डैरव** प्रत्यय योजन करने पर भैरव शब्द निष्पन्न होता है। जिससे **विभेति क्लेशो यस्मादिति भैरवः** अर्थ को निष्पत्ति होती है। अर्थात् जिससे क्लेश डरता है उन्हें भैरव कहते है।

तथा च—**भृ** धातु से **डैरव** प्रत्यय करने पर भैरव शब्द की निष्पत्ति होगी जिसका अर्थ होगा **भरति विश्वमिति भैरवः** विश्व का भरण करनेवाले सृष्टिस्थितिसंहारक देवता।

भैरव साक्षात् शिवशङ्कर के ही अवतारी स्वरूप हैं, शिव का ही एक रूप भैरव का है, उन भैरव का ही एक भेद स्वर्णाकर्षण भैरव है।

भैरवः पूर्णरूपो हि शङ्करस्य परात्मनः।
मूढास्ते वै न जानन्ति मोहिताः शिवमायया:॥

भैरव की उत्पत्ति के प्रसङ्ग में एक पौराणिक आख्यान प्राप्त होता है। पूर्व काल में आपद् नामक राक्षस ने कठोर तपस्या कर वर प्राप्त कर लिया था, जिसके कारण वह सभी देवी देवताओं से अजेय बन गया। उसने अपनी मृत्यु पाँच वर्ष के विशिष्ट रूप, तेज एवं गुणों से सम्पन्न बालक के हाथों से चाही और वह वर उसे प्राप्त हो चुका था, फलस्वरूप उस महाबली, पर्वताकार एवं अतिक्रूर राक्षस के आसुरी अत्याचारों से तीनों लोकों में उत्पीडन मच गया और त्राहि-त्राहि की पुकार उठने लगी, देव वर्ग उसके अत्याचारों से बहुत भीत और त्रस्त हो गया। इस घोर सङ्कट से त्राण पाने एवं त्रिलोकी को उबारने के लिए सभी देवता एकत्र होकर आपद् के वध का उपाय सोचने लगे।

अकस्मात् उन सब के देह से एक-एक तेजोधारा निकली और प्रत्येक देव युगल के तेजस् के मिलने से एक पञ्चवर्षीय बालक का आविर्भाव हुआ, जो उन उन युगल का वटुक कहा जाता है। इन असङ्ख्य वटुकों के उद्भव के बाद वह तेजोधारा और आगे बढ़ी और एक स्थान पर जाकर पुञ्जीभूत हो गई। कालान्तर में उन वटुकों की ही भैरव संज्ञा हो गयी और आपद् नामक राक्षस को मारकर देवताओं को सङ्कट से मुक्त किया। कालान्तर में उनका ही एक रूप स्वर्णाकर्षण नाम से प्रसिद्ध हुआ।

उपासना करने पर भक्तों को सुवर्ण धनधान्यादि प्रदान करने के कारण ही इनका नाम स्वर्णाकर्षण भैरव पड़ा, अष्टोत्तर शतनाम में इनका नाम धनद तथा अधन(दरिद्रता)हारी के रूप में भी आता है।

धनदोऽधहारीश्च धनवान् प्रतिभानवान्।

पूर्व काल में अज नामक राक्षस का वध स्वर्णाकर्षण भैरव ने किया। स्वर्णाकर्षण भैरव चार भुजाओंवाले, पाश, अङ्कुश, वर और अभयधारी, चन्द्र धारण करनेवाले, जटाजुट एवं स्वर्णाभरणों से सुशोभित एवं सिद्ध विद्याधरों से सेवित हैं।

पीतवर्णं चतुर्बाहुं त्रिनेत्रं पीतवाससम्।
अक्षयं स्वर्णमाणिक्यतडित्पुरितपात्रकम्॥ १॥
अभिलसन् महाशूलं चामरं तोमरोद्वहम्।
चिन्तये भैरवं देवं सर्वसिद्धिप्रदायकम्॥ २॥
मन्दारद्रुमकल्पमूलमहिते माणिक्यसिंहासने,
संविष्टोदरभिन्नचम्पकरुचा देव्या समालिङ्गितः।
भक्तेभ्यः कररत्नपात्रभरितं स्वर्ण ददानो भृशं,
स्वर्णाकर्षण भैरवो विजयते स्वर्णाकृतिः सर्वदा॥ ३॥

भगवान् स्वर्णाकर्षण भैरव को प्रमथादि गणों का अधीश्वर और पराक्रम शिवतुल्य कहा गया है।

भगवन् प्रमथाधीश शिवतुल्यपराक्रमः।

भैरव का गुण भेद से सात्त्विक, राजस और तामस स्वरूप बताया गया है, जो अलग अलग कामनाओं की पूर्ति के लिए है।

यथा कामं तथा ध्यानं कारयेत् साधकोत्तमः।

महाभैरव का सात्त्विक स्वरूप अपमृत्यु निवारक, आयु-आरोग्य का प्रदाता तथा मोक्ष फल देनेवाला है। राजस स्वरूप धर्म, अर्थ तथा काम की सिद्धि देनेवाला है। तामस स्वरूप कृत्या-भूतप्रेत-ग्रहादि तथा शत्रूओं का शमन करनेवाला है।

महाभैरव का सात्त्विक स्वरूप—स्फटिक के समान शुभ्रवर्ण, कुण्डलों से देदीप्यमान, दिव्य मणिमय, किङ्किणी और नूपुर से भूषित, तेजस्वी प्रसन्नवदन, त्रिनेत्र, शूल और दण्ड धारण किये हुए, बालक सदृश रूपवाला है।

वन्दे बालं स्फटिकसदृशं कुण्डलोद्भासिताङ्गं,
दिव्याकल्पैर्नवमणिमयैः किङ्किणी नूपुराद्यैः।
दीप्ताकारं विशदवदनं सुप्रसन्नं त्रिनेत्रं,
हस्ताग्राभ्यां वटुकसदृशं शूलदण्डोपधानाम्॥

महाभैरव का राजस स्वरूप—उगते हुए सूर्य के समान अरुण वर्ण, त्रिनयन, लालपुष्पों की माला धारण किये हुए, प्रसन्न मुख, हाथों में वरद, कपाल, अभय और शूल धारण किये हुए, नीलग्रीव, उदारता से युक्त, चन्द्रकला से विभूषित एवं लाल वस्त्र धारण किये हुए, समस्त भयों का हरण करनेवाला है।

उद्यद्भास्करसन्निभं त्रिनयनं रक्ताङ्गरागस्रजं,
स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः।
नीलग्रीवमुदारभूषणयुतं शीतांशुखण्डोज्वलं,
बन्धूकारुणवाससं भयहरं देवं सदाभावये॥

महाभैरव का तामस स्वरूप—नील पर्वत के समान वर्णवाले, चन्द्रकलाधर, मुण्डमालाधारी, महेश, दिगम्बर, दीपशिखा के समान रंगवाले केशों से युक्त, डमरू, अङ्कुश, खड्ग, पाश, अभय, नाग, घण्टा एवं कपालरूप आयुधों को आठ हाथों में ग्रहण किये हुए, विकराल दाढ़ोंवाले, त्रिनेत्र तथा मणिमय किंकिणी और नूपुरों से विभूषित है।

वन्दे नीलाद्रिकान्तं शशिसकलधरं मुण्डमालं महेशं,
दिग्वस्त्रं पिङ्गकेशं डमरुमथसृणिं खड्गपाशाभयानि।
नागं घण्टां कपालं करसरसिरुहैर्बिभ्रतं भीमदंष्ट्रं,
दिव्याकल्पं त्रिनेत्रं मणिमयविलसत्किङ्किणीनूपुराढ्यम्॥

महाभैरव का स्वर्णाकर्षण स्वरूप महत्पुण्य तथा सर्वैश्वर्य प्रदायक है, यह स्वरूप उपासकों के लिए चिन्तामणि तथा कल्पतरु है। स्वर्णाकर्षण भैरव की उपासना से साधक त्रिलोकी को वश में कर लेता है और अचला लक्ष्मी तथा श्री को प्राप्त कर लेता है।

चिन्तमणिमवाप्नोति धेनुं कल्पतरुं ध्रुवम्।
स्वर्णराशिमवाप्नोति शीघ्रमेव स मानवः॥
लोकत्रयं वशीकुर्यात् अचलां श्रियमाप्नुयात्।
न भयं विद्यते क्वापि विषभूतादि सम्भवम्॥

स्वर्णाकर्षण भैरव की उपासना विभिन्न कल्पों में अलग अलग स्वरूपों में की गयी जो शास्त्रों में उल्लिखित हैं। जिसमें सद्यः रूप से मनुष्यों को समस्त दरिद्रताओं से मुक्ति कराकर धन प्रदान करनेवाला स्वर्णाकर्षणभैरव प्रयोग है, शास्त्रों में इस प्रयोग की भूरि-भूरि प्रशंसा की गयी है।

श्रीस्वर्णाकर्षणभैरव की ही प्रेरणा से लोक कल्याणार्थ स्वर्णाकर्षणभैरवप्रयोग(वैदिक विधि) ग्रन्थ का लेखन हुआ। कर्मकाण्ड विषयक आचार्यों को विशेष ध्यान रख कर इस ग्रन्थ की रचना हुई है, जिसका अनुसरण कर विद्वात् जन इसका प्रयोग अपने तथा लोकहित में करेंगें।

विद्वत्चरणचञ्चरीक,
डॉ० रामप्रियपाण्डेयः

विषय-सूची:

स्वस्तितिलकधारणम्	१
पञ्चगव्यप्राशनम्	१
त्रिराचमनम्	१
पवित्रिधारणम्	१
पवित्रिकरणम्	१
यज्ञभूमिपूजनम्	२
शिखास्पर्शनम्	२
श्रीगुरुस्मरणम्	२
स्वस्तिवाचनम्	२
प्रधानसङ्कल्पम्	४
गणेशाम्बिकापूजनम्	५
गणेशाथर्वशीर्षम्	१४
गणेशाथर्वशीर्षपाठमाहात्म्यम्	१५
देव्याथर्वशीर्षम्	१६
देव्याथर्वशीर्षमाहात्म्यम्	१७
स्वस्तिकलशस्थापनम्	१९
पुण्याहवाचनम्	२७
अभिषेकम्	३५
षोडशमातृकासप्तघृतमातृकापूजनम्	३८
आयुष्यमन्त्रम्	५१
साङ्कल्पिकेन विधिना नान्दीश्राद्धम्	५२
आचार्यादिवरणम्	५९
रक्षोघ्नकर्मम्	६२
पञ्चगव्यकरणम्	६४
सर्वतोभद्रदेवतानां स्थापनम्	६५
सर्वतोभद्रदेवतानां पूजनम्	७१
प्रधानकलशस्थापनम्	७८
पीठदेवतास्थापनंपूजनञ्च	८१
अग्न्युत्तारणम्	८४
इष्टपूजनम्	८६
मूलमन्त्रजपम्	९९
अखण्डदीपपूजनम्	१०५
पुस्तकपूजनम्	१०७
पञ्चभू:संस्कारम्	१०९
अग्निस्थापनम्	११०
ग्रहमण्डलस्थदेवतास्थापनम्	११२
ग्रहमण्डलस्थदेवातानां पूजनम्	१२१
असङ्ख्यातरुद्रपूजनम्	१२८
कुशकण्डिकाविधिः	१३७
हवनम्	१४१
ग्रहमण्डलस्थदेवायहवनम्	१४१
असंख्यातरुद्रायहवनम्	१४४
प्रधानदेवायहवनम्	१४४
मूलमन्त्रहवनम्	१४५
आवाहितदेवताभ्यः हवनम्	१४५
षोडशमातृकाहवनम्	१४५
सप्तघृतमातृकाहवनम्	१४७
अग्निपूजनपूर्वकस्विष्टकृत्होमः	१४७
भूरादिनवाहुतिः	१४७
एकतन्त्रेण दिग्पालादिबलिदानम्	१४८
एकतन्त्रेणग्रहादिबलिदानम्	१४९
क्षेत्रपालायबलिदानम्	१४९
पूर्णाहुतिः	१५०
वसोर्द्धाराहोमः	१५१

अग्नि-प्रदक्षिणा	१५२
हवनीयकुण्डभस्मधारणम्	१५२
पूर्णपात्रदानम्	१५२
श्रेयोदानम्	१५३
ब्राह्मणदक्षिणादानम्	१५३
भूयसीदक्षिणादानम्	१५३
ब्राह्मणभोजनम्	१५३
प्रधानपीठादिदानम्	१५४
यजमान-अभिषेकः	१५४
छायापात्रदानम्	१५५
क्षमाप्रार्थनाम्	१५६
आवाहितदेवतानांविसर्जनम्	१५६
यजमानरक्षाबन्धनम्	१५७
यजमानपत्नीरक्षाबन्धनम्	१५७
यजमानतिलकाशीर्वादम्	१५७
यजमानपत्नी आशीर्वादम्	१५७
पूजनसामग्री	१५८
ग्रन्थकारस्य अन्या कृतयः	१६०

।। श्रीः ।।

स्वर्णाकर्षणभैरवप्रयोगम्

सर्वप्रथम यजमान अपनी पत्नी के साथ शुभमुहूर्त में शुभासन पर बैठ करके तिलक करने के बाद शरीरशुद्ध्यर्थ तथा कर्माधिकारप्राप्त्यर्थ पञ्चगव्य का प्राशन अधोलिखित मन्त्र द्वारा करे। तीन बार केशव, नारायण और माधव इन तीनों नामों से अलग-अलग आचमन करे। शरीरशुद्ध्यर्थ तथा कर्माधिकारप्राप्त्यर्थ तिलक करने के बाद पञ्चगव्य का प्राशन अधोलिखित मन्त्र द्वारा करे।

स्वस्तितिलकधारणम्—अधोलिखित मन्त्र से तिलक धारण करे—

ॐ युञ्जन्तिब्ब्रध्नमरुषञ्चरन्तम्परितस्त्थुषः॥ रोचन्तेरोचनादिवि॥ युञ्जन्त्यस्य काम्म्याहरीव्विपक्षसारथै॥ शोणाधृष्ण्णूनृवाहसा॥

तिलक करने के बाद पञ्चगव्यप्राशन करे—

पञ्चगव्यप्राशनम्—अधोलिखित मन्त्र पाठ करते हुए पञ्चगव्य का प्राशन करे—

ॐ यत्वगस्थिगतं पापं देहे तिष्ठति मामकीम्।
प्राशनात्पञ्चगव्यस्य पिबेत्यग्निरिवेन्धनम्॥

प्रार्थनापूर्वक पञ्चगव्यप्राशन के पश्चात् तीन बार आचमन करे—

त्रिराचमनम्—ॐ केशवाय नमः॥ ॐ नारायणाय नमः॥ ॐ माधवाय नमः॥

ॐ हृषीकेशाय नमः॥ मन्त्र बोलकर हाथ धोये।

पवित्रिधारणम्—अधोलिखित मन्त्र से पवित्री धारण करे—

ॐ पवित्रैस्त्थोवैष्ण्णव्यौसवितुर्व्वः प्प्रसवऽउत्पुनाम्म्यच्छिद्रेणपवित्रेणसूर्य्यस्य रश्मिभिः॥ तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामःपुनेतच्छकेयम्॥

पवित्रिकरणम्—पवित्री धारण के पश्चात् तीन बार पुनः आचमन करे। आचमन करने के पश्चात् प्राणायाम करे तथा अधोलिखित मन्त्र से अपने ऊपर जल छिड़के—

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

ॐ पुण्डरीकाक्षः पुनातु॥ ॐ केशवः पुनातु॥ ॐ नारायणः पुनातु॥

यज्ञभूमिपूजनम्—हाथ में पुष्पाक्षत लेकर भूमि पूजन करे—

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता।
त्वञ्च धारय मां देवि पवित्रं कुरु चासनम्॥

ॐ यज्ञभूम्यै नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

शिखास्पर्शनम्—हाथ से शिखास्पर्श करे—

ऊर्ध्वकेशे विरुपाक्षि मांस-शोणित-भोजने।
तिष्ठ देवि शिखामध्ये चामुण्डे चापराजिते॥

श्रीगुरुस्मरणम्—अपने श्रीगुरु का ध्यान करे—

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।
गुरुः साक्षात् परब्रह्म तस्मै श्रीगुरवे नमः॥

ॐ गुरुभ्यो नमः॥ ॐ परमगुरुभ्यो नमः॥ ॐ परात्परगुरुभ्यो नमः॥ ॐ परमेष्ठिगुरुभ्यो नमः॥ ॐ मानवौघगुरुभ्यो नमः॥ ॐ सिद्धौघगुरुभ्यो नमः॥ ॐ दिव्यौघगुरुभ्यो नमः॥ सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि॥

स्वस्तिवाचनम्

यजमान हाथ में पुष्प लेकर ब्राह्मणों के द्वारा कृत स्वस्तिमन्त्रों को ध्यानपूर्वक सुने।

ॐ आनोभद्राःक्रतवोयन्तुविश्वतोऽदब्धासोऽअपरीतासऽउद्भिदः॥ देवानोयथासदमिद्वृधेऽअसन्नप्रायुवोरक्षितारोदिवेदिवे॥१॥ देवानाम्भद्रासुमतिर्ऋजूयतान्देवानाꣳरातिरभिनोनिवर्त्तताम्॥ देवानाꣳसख्यमुपसेदिमावयन्देवानऽआयुःप्रतिरन्तुजीवसे॥२॥ तान्पूर्वयानिविदाहूमहेवयम्भगम्मित्रमदितिन्दक्षमस्रिधम्॥ अर्य्यमणंवरुणꣳसोममश्विनासरस्वतीनःसुभगामयस्करत्॥३॥ तन्नोवातोमयोभुवातुभेषजन्तन्मातापृथिवीतत्पिताद्यौः॥ तद्ग्रावाणःसोमसुतोमयोभुवस्तदश्विनाशृणुतन्धिष्ण्ण्यायुवम्॥४॥ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसेहूमहेवयम्॥ पूषानोयथावेदसामसद् धेरक्षितापायुरदब्धःस्वस्तये॥५॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः॥ स्वस्तिनस्ताक्ष्योऽअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु॥६॥ पृषदश्वामरुतःपृश्निमातरःशुभंय्यावानोविदथेषुजग्मयः॥ अग्निजिह्वामनवःसूरचक्षसोविश्वेनोदेवाऽअवसागमन्निह॥७॥ भद्रङ्कर्णेभिःशृणुयामदेवाभद्रम्पश्येमाक्षभिर्य्यजत्राः॥ स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहिदेवहितंय्यदायुः ॥८॥ शतमिन्नुशरदोऽअन्तिदेवायत्रानश्चक्राजरसन्तनूनाम्॥ पुत्रासोयत्रपितरोभवन्तिमानोमद्ध्यारीरिषतायुर्गन्तोः॥९॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्मातासपितासपुत्रः॥ विश्वेदेवाऽअदितिःपञ्चजनाऽअदितिर्ज्जातमदितिर्ज्जनित्त्वम्॥१०॥ ॐ द्यौःशान्तिरन्तरिक्षꣳशान्तिःपृथिवीशान्तिरापःशान्तिरोषधयःशान्तिः॥ वनस्पतयःशान्तिर्विश्वेदेवाःशान्तिर्ब्रह्मशान्तिःसर्वꣳशान्तिः-

शान्ति॒रि॒वशान्ति॒ꣳसामा॒शान्ति॒रिधि॥ यतो॑यतः॒सु॒मीह॑सेततो॑नो॒ऽअभ॑यङ्कुरु॥ शन्नः॑कुरु-प्र॒जाभ्यो॒भ॑यन्नꣳप्प॒शुभ्यः॑॥ सुशान्तिर्भवतु॥

श्रीमन्महागणाधिपतये नमः॥ लक्ष्मीनारायणाभ्यां नमः॥ उमामहेश्वराभ्यां नमः॥ वाणीहिरण्यगर्भाभ्यां नमः॥ शचीपुरन्दराभ्यां नमः॥ मातापितृभ्यां नमः॥ इष्टदेवताभ्यो नमः॥ कुलदेवताभ्यो नमः॥ ग्रामदेवताभ्यो नमः॥ वास्तुदेवताभ्यो नमः॥ स्थानदेवताभ्यो नमः॥ सर्वेभ्यो देवेभ्यो नमः॥ सर्वेभ्यो ब्राह्मणेभ्यो नमः॥

विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवम्।
वन्दे काशीङ्गुहां गङ्गां भवानीं मणिकर्णिकाम्॥१॥
वक्रतुण्ड! महाकाय! कोटिसूर्यसमप्रभ।
निर्विघ्नं कुरु मे देव! सर्वकार्येषु सर्वदा॥२॥
सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः॥३॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि॥४॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा।
सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते॥५॥
शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये॥६॥
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुराऽसुरैः।
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः॥७॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि! नमोऽस्तु ते॥८॥
सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम्।
येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः॥९॥
तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेंऽघ्रियुगं स्मरामि॥१०॥
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः॥११॥
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम॥१२॥
अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥१३॥

स्मृतेः सकलकल्याणं भाजनं यत्र जायते।
पुरुषं तमजं नित्यं व्रजामि शरणं हरिम्॥१४॥
सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः।
देवाः दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः॥१५॥

श्रीमन्महागणाधिपतये नमः॥

प्रधानसङ्कल्पम्

सङ्कल्पः—**ॐ विष्णुः-विष्णुः-विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्रीब्रह्मणोऽह्निद्वितीयपरार्द्धे विष्णुपदे श्रीश्वेतवाराहकल्पे वैवस्वत-मन्वन्तरे अष्टाविंशतितमे युगे कलियुगे कलिप्रथमचरणे भूर्लोके भारतवर्षे भरतखण्डे आर्यावर्तैकदेश अमुकक्षेत्रे** (यदि वाराणसी में अनुष्ठान करना हो तो **अविमुक्तवाराणसीक्षेत्रे महाश्मशाने गौरीमुखे त्रिकंटकविराजिते भागीरथ्याः पश्चिमे तीरे**) **विक्रमशके बौद्धावतारे अमुकसंवत्सरे अमुकायने अमुकऋतौ महामाङ्गल्यप्रदमासोत्तमे भासे पुण्यपवित्रमासे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते श्रीचन्द्रे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते श्रीदेवगुरौ शेषेषु ग्रहेषु यथायथाराशिस्थानस्थितेषु सत्सु एवं ग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकप्रवरः अमुकनामाऽहं ममात्मनः सपरिवारस्य च दुःखदारिद्र्यदौर्भाग्यादि-सकलदोषपरिहारार्थं मम जन्मकुण्डल्यां, चन्द्रकुण्डल्यां, भावकुण्डल्यां ये केचन चतुर्थाष्टमषष्ठद्वादशस्थानस्थितसमस्तग्रहजन्यसकल अशुभदृष्टिसमस्तदुःखनिवृत्ति-पूर्वकसकलानिष्टयोगेन शरीरे व्यवहारे च उत्पन्नानां उत्पद्यमानानां च समस्तविघ्नानां दुःखानां शरीरस्थितकष्टानां ज्वरादिपीड़ादिनां निवृत्तिपूर्वकत्रिविधतापोपशमनार्थं भूत-प्रेतपिशाचडाकिन्यादिकृत सर्वेषामन्यानां कृतयन्त्रमन्त्रतन्त्रादिकृतसमस्ताभिचारादिनाञ्च अस्मद् गृहे वास्त्वादिदोषानां उपशान्तिपूर्वकं दीर्घायुरारोग्यैश्वर्यवंशाभिवृद्धिसमस्तसुख-सौभाग्यादिप्राप्त्यर्थं सकलकामनापरिपूर्तिपूर्वकसकलाभीष्टसिद्ध्यर्थं श्रुतिस्मृतिपुराणोक्त-फलप्राप्तयर्थं समस्तविघ्ननिवृत्यर्थं सकलापद्विपत्ति सद्यः विनाशार्थे स्वर्णाकर्षणभैरवप्रीत्यर्थं स्वर्णाकर्षणभैरवप्रयोगं करिष्ये।**

पुनः हाथ में जल लेकर—**तदङ्गत्वेन स्वस्तिपुण्याहवाचनं मातृकापूजनं वसोर्द्धारापूजनं आयुष्यमन्त्रजपं साङ्कल्पिकेन विधिना नान्दीश्राद्धं आचार्यादिवरणानि च करिष्ये।**

पुनः हाथ में जल लेकर—**तत्राऽऽदौ निर्विघ्नतासिद्ध्यर्थं गणेशाम्बिकयोः पूजनं करिष्ये।**

दो पात्रों में अक्षत भर कर अष्टदल कमल निर्मित करके उस पर गोमय मय लिङ्गरूप गौरी तथा फलमय लिङ्गरूप गणेश की स्थापना करके हाथ में पुष्प लेकर महागणपति का ध्यान करे।

गणेशाम्बिकापूजनम्

गणपतिध्यानम्—हाथ में अक्षत लेकर महागणपति का ध्यान करे—

ॐ गणानान्त्वागणपतिँ हवामहेप्प्रियाणान्त्वाप्प्रियपतिँ हवामहेनिधीनान्त्वानिधिपतिँ हवामहेवसोमम॥ आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम्॥

ॐ भूर्भुवः स्वः ऋद्धिसिद्धिसहितमहागणाधिपतये नमः ऋद्धिसिद्धिसहितमहागणाधिपतिं ध्यायामि, ध्यानार्थे पुष्पाणि समर्पयामि।

एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भुजम्।
पाशाङ्कुशधरं देवं ध्यायेत्सिद्धिविनायकम्॥ १॥
ध्यायेद्गजाननं देवं तप्तकाञ्चनसन्निभम्।
चतुर्भुजं महाकायं सर्वाभरणभूषितम्॥ २॥
हे हेरम्ब! त्वमेह्येहि ह्यम्बिकात्र्यम्बकात्मज!।
सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभपितुः पितः॥ ३॥
नागास्यं नागहारं त्वां गणराजं चतुर्भुजम्।
भूषितं स्वायुधैर्दिव्यैः पाशाङ्कुशपरस्वधैः॥ ४॥
आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः।
इहाऽगत्य गृहाण त्वं पूजायागं च रक्ष मे॥ ५॥

ॐ भूर्भुवः स्वः ऋद्धिसिद्धिसहितमहागणाधिपतये नमः ऋद्धिसिद्धिसहितं महागणाधिपतिमावाहयामि, आवाहनार्थे अक्षतान् समर्पयामि।

ध्यानम्—हाथ में पुष्प लेकर महागौरी का ध्यान करे—

ॐ अम्बेऽअम्बिकेऽम्बालिकेनमानयतिकश्श्चन॥ ससस्त्यश्श्वकः सुभद्रिकाङ्काम्पीलवासिनीम्॥ ॐ भूर्भुवः स्वः महागौर्यै नमः महागौरीं ध्यायामि, ध्यानार्थे पुष्पाणि समर्पयामि।

आवाहनम्—हाथ में अक्षत लेकर महागौरी का आवाहन करे—

हेमाद्रितनयां देवीं वरदां शङ्करप्रियाम्।
लम्बोदरस्य जननीं गौरीमावाहयाम्यहम्॥

ॐ भूर्भुवःस्वः महागौर्यै नमः महागौरीमावाहयामि, आवाहनार्थे अक्षतान् समर्पयामि।

प्रतिष्ठा—दोनों हाथ से स्पर्श करके प्रतिष्ठा करे—

ॐ मनोजूतिर्जुषतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टंय्यज्ञꣳसमिमन्दधातु॥ विश्वेदेवासऽइहमादयन्तामोꣳम्प्रतिष्ठ॥

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणा क्षरन्तु च।
अस्यै देवत्वमर्चायै मामहेति च कश्चन॥
गणेशाम्बिके सुप्रतिष्ठिते वरदे भवेताम्॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः प्रतिष्ठापनार्थे अक्षतान्निवेदयामि आवाहिताः सुप्रतिष्ठिताः सन्निहिताः वरदाः भवन्तु।

ध्यानम्—दोनों हाथों से पुष्प लेकर ध्यान करे—

ॐ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात्॥ सभूमिꣳसर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः ध्यानार्थे पुष्पाणि समर्पयामि।

आसनम्—दोनों हाथों से अक्षत लेकर आसन ध्यान कर समर्पित करे—

ॐ पुरुषऽएवेदꣳसर्वंय्यद्भूतंयच्चभाव्यम्॥ उतामृतत्त्वस्येशानोयदन्नेनातिरोहति॥

विचित्ररत्नखचितं दिव्यास्तरणसंयुतम्।
स्वर्णसिंहासनं चारु गृहणीष्व सुरपूजित!॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः आसनार्थे अक्षतान् समर्पयामि।

पाद्यम्—दोनों हाथों से पाद्यपात्र ग्रहणकर समर्पित करे—

ॐ एतावानस्यमहिमातोज्ज्यायाँश्चपूरुषः॥ पादोऽस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि॥

सर्वतीर्थसमुद्भूतं पाद्यं गन्धादिभिर्युतम्।
विघ्नराज गृहाणेदं भगवान् भक्तवत्सल!॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः पादयोः पाद्यं समर्पयामि।

अर्घ्यम्—दोनों हाथों से अर्घ्यपात्र लेकर समर्पित करे—

ॐ त्रिपादूर्द्ध्वऽउदैत्पुरुषःपादोऽस्येहाभवत्पुनः॥ ततोविष्वङ्व्यक्रामत्साशनानशनेऽअभि॥

गणाध्यक्ष नमस्तेऽस्तु गृहाण करुणाकर।
अर्घ्यञ्च फलसंयुक्तं गन्धमाल्याक्षतैर्युतम्॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः अर्घ्यं समर्पयामि।

आचमनम्—दोनों हाथों से आचमनीयपात्र लेकर समर्पित करे—

ॐ ततोविराडजायतविराजोऽअधिपूरुषः॥ सजातोऽअत्यरिच्यतपश्चाद्भूमिमथो-पुरः॥

विनायकं नमस्तुभ्यं त्रिदशैरभिवन्दित।
गङ्गोदकेन देवेश कुरुष्वाचमनं प्रभो॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः आचमनार्थे गङ्गोदकं समर्पयामि।

स्नानीयम्—दोनों हाथों से स्नानीयपात्र लेकर समर्पित करे—

ॐ तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्ज्यम्॥ पशूँस्ताँश्चक्रेवायव्यानारण्याग्राम्याश्चये॥

मन्दाकिन्यास्तु यद्वारि सर्वपापहरं शुभम्।
तदिदं कल्पितं देव स्नानार्थं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः स्नानीयं जलं समर्पयामि।

पुनराचमनीयम्—दोनों हाथों से आचमनीय जल लेकर समर्पित करे—

ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः सामानिजज्ञिरे॥ छन्दाᳬसिजज्ञिरेतस्माद्यजुस्तस्माद-जायत॥

गङ्गोदकस्य यद्वारि सर्वमलहरं परम्।
तदिदं समर्पितं देव पुनराचमनं शुभम्॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः पुनराचमनार्थे गङ्गोदकं समर्पयामि।

पयःस्नानम्—दोनों हाथों से पयः पात्र लेकर समर्पित करे—

ॐ पयः पृथिव्यांपयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः॥ पयस्वतीः प्रदिशः सन्तु-मह्यम्॥

कामधेनुसमुद्भूतं सर्वेषां जीवनं परम्।
पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम्॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः पयःस्नानं समर्पयामि।

दधिस्नानम्—दोनों हाथों से दधिपात्र लेकर समर्पित करे—

ॐ दधिक्राव्णोऽअकारिषंजिष्णोरश्वस्यवाजिनः॥ सुरभिनोमुखाकरत्प्रणऽआयूᳬषि-तारिषत्॥

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्।
दध्यानीतं मया देव! स्नानार्थं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः दधिस्नानं समर्पयामि।

घृतस्नानम्—दोनों हाथों से घृतपात्र लेकर समर्पित करे—

ॐ घृतम्मिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतम्वस्यधाम॥ अनुष्ष्वधमावहमादयस्व स्वाहाकृतंवृषभवक्षिहव्यम्॥

नवनीतसमुत्पन्नं सर्वसन्तोषकारकम्।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः घृतस्नानं समर्पयामि।

मधुस्नानम्—दोनों हाथों से मधुपात्र लेकर समर्पित करे—

ॐ मधुवाताऽऋतायतेमधुक्षरन्तिसिन्धवः॥ माद्ध्वीर्न्नःसन्त्वोषधीः॥ मधुनक्त-मुतोषसोमधुमत्पार्थिवरजः॥ मधुद्यौरस्तुनःपिता॥ मधुमान्नोवनस्पतिर्म्मधुमाँऽअस्तु-सूर्य्यः॥ माद्ध्वीर्ग्गावोभवन्तुनः॥

पुष्परेणुसमुद्भूतं सुस्वादु मधुरं मधु।
तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः मधुस्नानं समर्पयामि।

शर्करास्नानम्—दोनों हाथों से शर्करापात्र लेकर समर्पित करे—

ॐ अपाᳬरसमुद्वयसᳫसूर्य्येसन्तᳫसमाहितम्॥ अपाᳬरसस्ययोरसस्तंवोगृह्णा-म्युत्तममुपयामगृहीतोऽसीन्द्रायत्त्वाजुष्टंगृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टतमम्॥

इक्षुरससमुद्भूतां शर्करां पुष्टिदां शुभाम्।
मलापहारिकां दिव्यां स्नानार्थं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः शर्करास्नानं समर्पयामि।

पञ्चामृतस्नानम्—दोनों हाथ से पञ्चामृतपात्र लेकर समर्पित करे—

ॐ पञ्चनद्यःसरस्वतीमपियन्तिसस्रोतसः॥ सरस्वतीतुपञ्चधासोदेशेभवत्सरित्॥

पञ्चामृतं मयाऽऽनीतं पयो दधि घृतं मधु।
शर्करा च समायुक्तं स्नानार्थं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः मिलितपञ्चामृतस्नानं समर्पयामि।

शुद्धोदकस्नानम्—दोनों हाथों से जलपात्र लेकर समर्पित करे—

ॐ शुद्धवालःसर्वशुद्धवालोमणिवालस्तऽआश्विनाःश्येतःश्येताक्षोरुणस्तेरुद्राय पशुपतयेकर्ण्णायामाऽअवलिप्तारौद्रानभोरूपाःपार्ज्जन्याः॥

गङ्गा च यमुना चैव गोदावरि सरस्वती।
नर्मदासिन्धुकावेरी स्नानार्थं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः शुद्धोदकस्नानं समर्पयामि।

वस्त्रनिवेदनम्—दोनों हाथों से वस्त्र लेकर समर्पित करे—

ॐ तस्मादश्श्वाऽअजायन्तयेकेचोभयादतः॥ गावोहजज्ञिरेतस्म्मात्तस्म्माज्जाताऽअजावयः॥

ॐ युवासुवासाः परिवीतऽआगात्सऽउत्श्रेयान्भवतिजायमानः।
तंधीरासः कवयऽउन्नयन्ति स्वाध्योमनसा देवयन्तः॥

शीतवातोष्णसन्त्राणं लज्जाया रक्षणं परम्।
देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः वस्त्रं समर्पयामि।

वस्त्राङ्गाचमनीयजलम्—दोनों हाथों से आचमनीय लेकर समर्पित करे—

ॐ आपोहिष्ठामयोभुवस्तानऽऊर्जेदधातन॥ महेरणायचक्षसे॥ ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः वस्त्रान्ते आचमनीयं समर्पयामि।

उपवस्त्रनिवेदनम्—दोनों हाथों से उपवस्त्र लेकर समर्पित करे—

ॐ तंय्यज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्ग्रतः॥ तेनदेवाऽअयजन्तसाध्याऽऋषयश्श्चये॥ ॐ सुजातोज्योतिषासहशर्म्मवरूथमासदत्स्वः॥ वासोअग्ग्नेविश्श्वरूपङ्संव्ययस्वविभावसो॥ ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः उपवस्त्रं समर्पयामि।

उपवस्त्राङ्गाचमनीयजलम्—दोनों हाथों से आचमनीय जल लेकर समर्पित करे—

ॐ योवःशिवतमोरसस्तस्यभाजयतेहनः॥ उशतीरिवमातरः॥ ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः उपवस्त्रान्ते आचमनीयं समर्पयामि।

यज्ञोपवीतनिवेदनम्—दोनों हाथों से यज्ञोपवीत पकड़कर समर्पित करे—

ॐ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन्॥ मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्च्येते॥ ॐ यज्ञोदेवानाम्प्रत्त्येतिसुम्म्नमादित्त्यासोभवतामृडयन्तः॥ आवोर्वाचीसुमतिर्व्ववृत्त्यादङ्होश्चिद्याववरिवोवित्तरासदादित्त्येभ्यस्त्वा॥

ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥
नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम्।
उपवीतं मया दत्तं गृहाण गणनायक॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः यज्ञोपवीतं समर्पयामि।

यज्ञोपवीताङ्गाचमनीयम्—दोनों हाथों से आचमनीय लेकर समर्पित करे—

ॐ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्न्वथ॥ आपोजनयथाचनः॥ ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः यज्ञोपवीतान्ते आचमनीयं समर्पयामि।

सुगन्धिद्रव्यसमर्पणम्—दोनों हाथों से सुगन्धिद्रव्य लेकर समर्पित करे—

ॐ त्वाङ्गन्धर्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः॥ त्वामोषधेसोमोराजाविद्वान्यक्ष्माद-मुच्च्यत॥

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः गन्धानुलेपनं समर्पयामि।

अक्षतसमर्पणम्—दोनों हाथों से अक्षत लेकर समर्पित करे—

ॐ अक्षन्नमीमदन्तह्यवप्रियाऽअधूषत॥ अस्तौषतस्वभानवोविप्रानविष्ठयामतीयो-जान्विन्द्रतेहरी॥

अक्षताश्च सुरश्रेष्ठा कुङ्कुमाक्ताः सुशोभिताः।
मया निवेदिता भक्त्या गृहाण परमेश्वर!॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः अलङ्करणार्थे अक्षतान् समर्पयामि।

पुष्पमालासमर्पणम्—दोनों हाथों से पुष्पमाला लेकर समर्पित करे—

ॐ ओषधीःप्रतिमोदद्ध्वंपुष्प्यवतीःप्रसूवरीः॥ अश्श्वाऽइवसजित्त्वरीर्व्वीरुधःपार-यिष्णवः॥

माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो!।
मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः पुष्पमालां परिधापयामि।

दूर्वासमर्पणम्—दोनों हाथों से दूर्वा लेकर समर्पित करे—

ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषष्प्परि॥ एवानोदूर्व्वेप्रतनुसहस्रेणशतेनच॥

दूर्वाङ्कुरान्सुहरितान् अमृतान्मङ्गलप्रदान्।
आनीतांस्तव पूजार्थं गृहाण गणनायक!॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः दूर्वाङ्कुरान् समर्पयामि।

नानापरिमलद्रव्यसमर्पणम्—दोनों हाथों से अबीरबुक्का लेकर समर्पित करे—

ॐ अहिरिवभोगैःपर्व्वेतिबाहुंज्यायाहेतिम्परिबाधमानः॥ हस्तग्घ्नोविश्श्वावयुनानि विद्वान्पुमान्पुमांसंपरिपातुविश्वतः॥

अबीरं च गुलालं च चोवा चन्दनमेव च।
अबीरेणार्चितो देवमतः शान्तिं प्रयच्छ मे॥१॥
नानापरिमलैर्द्रव्यैर्निर्मितं चूर्णमुत्तमम्।
अबीरनामकं चूर्णं गन्धं चारुप्रगृह्यताम्॥२॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः नानापरिमलद्रव्याणि समर्पयामि।

सिन्दूरसमर्पणम्—दोनों हाथों से सिन्दूर लेकर समर्पित करे—

ॐ सिन्धौरिवप्राद्ध्वनेशूघनासोवार्तप्प्रमियःपतयन्तियह्वाः। घृतस्युधाराऽअरुषो नवाजीकाष्ठाभिन्दन्नूर्म्मिभिःपिन्न्वमानः॥

सिन्दूरं शोभनं रक्तं सौभाग्यं सुखवर्धनम्।
शुभदं कामदं चैव सिन्दूरं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः सिन्दूराभरणं समर्पयामि। ततः नैवेद्यं पुरतः संस्थाप्य धूपदीपौ प्रज्वाल्य। धूपदीप जला करके नैवेद्य समर्पित करे।

धूपसमर्पणम्—दोनों हाथों से धूपपात्र लेकर समर्पित करे—

ॐ ब्राह्मणोऽस्यमुखमासीद्बाहूराजन्यःकृतः॥ ऊरूतदस्ययद्वैश्यःपद्भ्याᳬशूद्रोऽ-अजायत॥ ॐ धूरसिधूर्व्वधूर्वन्तंधूर्व्वतंयोऽस्मान्धूर्वतितंधूर्व्वयंवयंधूर्वामः॥ देवानामसिवह्निनतमᳬसस्निनतमंपप्रितमंजुष्टतमंदेवहूतमम्॥

वनस्पतिरसोद्भूतो गन्धाढ्यो गन्धमुत्तमः।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः धूपं समर्पयामि।

दीपसमर्पणम्—दोनों हाथों से दीपपात्र लेकर समर्पित करे—

ॐ चन्द्रमामनसोजातश्चक्षोःसूर्य्योऽअजायत॥ श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत॥ ॐ अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहासूर्य्योज्ज्योतिर्ज्योतिःसूर्य्यःस्वाहा॥ अग्निर्वर्च्चोज्ज्योतिर्वर्च्चःस्वाहासूर्य्योवर्च्चोज्ज्योतिर्वर्च्चःस्वाहा॥ ज्ज्योतिःसूर्य्यःसूर्य्योज्ज्योतिः-स्वाहा॥

साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम्॥१॥
भक्त्या दीपं प्रयच्छामि देवाय परमात्मने।
त्राहि मां निरयाद् घोराद् दीपज्योतिर्नमोऽस्तु ते॥२॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः दीपज्योतिः समर्पयामि।

नैवेद्यसमर्पणम्—दोनों हाथों से नैवेद्यपात्र लेकर समर्पित करे—

ॐ नाभ्याऽआसीदन्तरिक्षᳪशीर्ष्णोद्यौःसमवर्त्तत॥ पद्भ्याम्भूमिर्दिशःश्रोत्रात्तथा-लोकाँ२॥ऽअकल्पयन्॥ ॐ अन्नपतेऽन्नस्यनोदेह्यनमीवस्यशुष्मिणः॥ पप्रदातारं-तारिषऊर्ज्जन्नोधेहिद्विपदेचतुष्पदे॥

नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु।
ईप्सितं मे वरं देहि परत्र च परां गतिम्॥१॥
शर्कराखण्डखाद्यानि दधिक्षीरघृतानि च।
आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम्॥२॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः नैवेद्यं समर्पयामि। ॐ प्राणाय स्वाहा। ॐ अपानाय स्वाहा। ॐ समानाय स्वाहा। ॐ उदानाय स्वाहा। ॐ व्यानाय स्वाहा। मध्ये पानीयं जलं उत्तरापोशनं समर्पयामि।

करोद्वर्तनसमर्पणम्—दोनों हाथ से करोद्वर्तन लेकर समर्पित करे—

ॐ अ॒ᳪशुना॑ते अ॒ᳪशुः पृ॑च्यतां॒ परु॑षा॒ परुः॑॥ ग॒न्धस्ते॒ सोम॑मवतु॒ मदा॑य॒ रसो॒ऽअच्यु॑तः॥

चन्दनं मलयोद्भूतं कस्तूर्यादिसमन्वितम्।
करोद्वर्तनकं देव! गृहाण परमेश्वर!॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः करोद्वर्तनार्थे चन्दनानुलेपनं समर्पयामि।

ताम्बूलादिसमर्पणम्—दोनों हाथों सें ताम्बूल लेकर समर्पित करे—

ॐ यत्पुरु॑षेण ह॒विषा॑ दे॒वा य॒ज्ञमत॑न्वत॥ व॒स॒न्तो॒ऽस्यासी॒दाज्यं॒ ग्री॒ष्मऽइ॒ध्मः श॒रद्ध॒विः॥

पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम्।
एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः मुखशुद्ध्यर्थे पूङ्गीफलमेलालवङ्गादि-नागवल्लिदलयुक्तताम्बूलवीटिकां समर्पयामि।

फलादिसमर्पणम्—दोनों हाथों से फलपात्र लेकर समर्पित करे—

ॐ याः फ॒लिनी॒र्या ऽअ॑फ॒ला ऽअ॑पु॒ष्पा याश्च॑ पु॒ष्पिणीः॑॥ बृह॒स्पति॑प्रसूता॒स्तानो॑ मु॒ञ्च॒त्वᳪह॑सः॥

इदं फलं मया देव स्थापितं पुरतस्तव।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः ऋतुकालोद्भवफलानि समर्पयामि।

दक्षिणासमर्पणम्—दोनों हाथों से दक्षिणा लेकर समर्पित करे—

ॐ हि॒र॒ण्य॒ग॒र्भः सम॑वर्त्त॒ताग्रे॑ भू॒तस्य॑ जा॒तः पति॒रेक॑ऽआसीत्॥ स दा॑धार पृथि॒वीं द्यामु॒तेमां कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः कृतायाः पूजायाः साद्गुण्यार्थे द्रव्यदक्षिणां समर्पयामि।

नीराजनसमर्पणम्—दोनों हाथों से नीराजन लेकर घुमाये—

ॐ आरा॑त्रि॒ पार्थि॑व॒ᳪ रजः॑ पि॒तुर॑प्रायि॒ धाम॑भिः॥ दि॒वः सदा॑ᳪसि बृह॒ती वि ति॑ष्ठस॒ऽ

आत्त्वेषंब्बर्त्ततेतमः॥ ॐ इदꣳहविः प्रजननंमेऽअस्तुदशवीरꣳसर्व्वगणꣳस्वस्तये॥ आत्मसनिप्प्रजासनिपशुसनिलोकसन्न्यभयसनिः॥ अग्निःप्प्रजांबहुलांमेकरोत्वन्नं पयोरेतोऽअस्म्मासुधत्त॥

कदलीगर्भसम्भूतं कर्पूरं तु प्रदीपितम्।
आरार्तिकमहं कुर्वे पश्य मे वरदो भव॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः कर्पूरनीराजनं समर्पयामि।

पुष्पाञ्जलिसमर्पणम्—दोनों हाथों से पुष्प लेकर समर्पित करे—

ॐ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्प्रथमान्न्यासन्॥ तेहनाकम्महिमानःसचन्त-यत्रपूर्व्वेसाद्ध्याःसन्न्तिदेवाः॥

नानासुगन्धिपुष्पाणि यथाकालोद्भवानि च।
पुष्पाञ्जलिर्मया दत्त गृहाण परमेश्वर!॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः मन्त्रपुष्पाञ्जलिं समर्पयामि।

परिक्रमासमर्पणम्—दोनों हाथों से पुष्प लेकर समर्पित करे—

ॐ सप्प्तास्यासन्न्परिधयस्त्रिःसप्प्तसमिधःकृताः॥ देवायद्यज्ञन्तन्न्वानाऽअबध्नन्-न्पुरुषम्पशुम्॥

यानि कानि च पापानि जन्मान्तरकृतानि च।
तानि सर्वाणि नश्यन्ति प्रदक्षिणा पदे पदे॥१॥
पदे पदे या परिपूजकेभ्यः सद्योऽश्वमेधादिफलं ददाति।
तां सर्वपापक्षयहेतुभूतां प्रदक्षिणां ते परितः करोमि॥२॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः परिक्रमां समर्पयामि।

परिक्रमा के पश्चात् जल, गन्ध, अक्षत, फल, पुष्प, दूर्वा, कुशा, दधि, दुग्ध, सर्षपादि द्रव्यों को अर्घ्यपात्र में लेकर विशेषार्घ्य प्रदान करे।

विशेषार्घ्यसमर्पणम्—दोनो हाथों में विशेषार्घ्य लेकर समर्पित करे—

ॐ रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक!।
भक्तानामभयं कर्ता त्राता भव भवार्णवात्॥१॥
द्वैमातुर कृपासिन्धो षाण्मातुरग्रज प्रभो!।
वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद॥२॥
अनेन सफलार्घ्येण फलदोऽस्तु सदा मम।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः विशेषार्घ्यं समर्पयामि।

प्रार्थनासमर्पणम्—दोनों हाथों सें पुष्प लेकर समर्पित करे—

ॐ विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय।
नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते॥१॥
भक्तार्तिनाशनपराय गणेश्वराय सर्वेश्वराय शुभदाय सुरेश्वराय।
विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय नमो नमस्ते॥२॥

नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः।
नमस्ते रुद्ररूपाय करिरूपाय ते नमः॥३॥
विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे।
भक्तप्रियाय देवाय नमस्तुभ्यं विनायक!॥४॥
लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय!।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥५॥

त्वां विघ्नशत्रुदलनेति च सुन्दरेति भक्तप्रियेति सुखदेति फलप्रदेति।
विद्याप्रदेत्यघहरेति च ये स्तुवन्ति तेभ्यो गणेश वरदो भव नित्यमेव॥६॥

गणेशपूजने कर्म यन्न्यूनमधिकं कृतम्।
तेन सर्वेण सर्वात्मा प्रसन्नोऽस्तु सदा मम॥७॥

देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य।
प्रसीद विश्वेश्वरि! पाहि विश्वं त्वमीश्वरी देवि! चराचरस्य॥१॥
रक्षांसि यत्रोग्रविषाश्च नागा यत्राऽरयो दस्युबलानि यत्र।
दावानलो यत्र तथाऽब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वम्॥२॥

मुखे ते ताम्बूलं नयनयुगले कज्जलकला,
ललाटे काश्मीरं विलसति गले मौक्तिकलता।
स्फुरत्काञ्ची-शाटी पृथुकटितटे हाटकमयी,
भजामि त्वां गौरीं नगपतिकिशोरीमविरतम्॥३॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः प्रार्थनापूर्वकं स्तुतिपाठं समर्पयामि।

गणेशाथर्वशीर्षम्

ॐ लँ नमस्ते गणपतये। त्वमेव प्रत्यक्षं तत्त्वमसि। त्वमेव केवलं कर्तासि। त्वमेव केवलं धर्तासि। त्वमेव केवलं हर्तासि। त्वमेव सर्वं खल्विदं ब्रह्मासि। त्वं साक्षदात्मासि नित्यम्। ऋतं वच्मि। सत्यं वच्मि। अव त्वं माम्। अव वक्तारम्। अव श्रोतारम्। अव दातारम्। अव धातारम्। अवानूचानम्। अव शिष्यम्। अव पश्चात्तात्। अव पुरस्तात्। अव चोत्तरात्। अव दक्षिणात्तात्। अव चोर्ध्वात्तात्। अवाधरात्तात्। सर्वतो मां पाहि पाहि समन्तात्। त्वं वाङ्मयः। त्वं चिन्मयः। त्वमानन्दमयः। त्वं ब्रह्ममयः। त्वं सच्चिदानन्दाद्वितीयोऽसि। त्वं प्रत्यक्षं ब्रह्मासि। त्वं ज्ञानमयो विज्ञानमयोऽसि। सर्वं जगदिदं त्वत्तो जायते। सर्वं जगदिदं त्वत्तस्तिष्ठति।

सर्वं जगदिदं त्वयि लयमेष्यति। सर्वं जगदिदं त्वयि प्रत्येति। त्वं भूमिरापोऽनलोऽनिलोनभः। त्वं चत्वारि वाक्पदानि। त्वं गुणत्रयातीतः। त्वं कालत्रयातीतः। त्वं देहत्रयातीतः। त्वं मूलाधारस्थितोऽसि नित्यम्। त्वं शक्तित्रयात्मकः। त्वां योगिनो ध्यायन्ति नित्यम्। त्वं ब्रह्मा। त्वं विष्णुः। त्वं रुद्रः। त्वं इन्द्रः। त्वं अग्निः। त्वं वायुः। त्वं सूर्यः। त्वं चन्द्रमा। त्वं ब्रह्म भूर्भुवः स्वरोम्। गणादिं पूर्वमुच्चार्य वर्णादिं तदनन्तरम्। अनुस्वारः परतरः। अर्धेन्दुलसितम्। तारेण रुद्धम्। एतत्तव मनुस्वरूपम्। गकारः पूर्वरूपम्। अकारो मध्यमरूपम्। अनुस्वारश्चान्त्यं रूपम्। बिन्दुरुत्तररूपम्। नादः सन्धानम्। संहिता सन्धिः। सैषा गणेशविद्या। गणक ऋषिः। निचृद्गायत्री छन्दः। श्रीमहागणपतिः देवता। ॐ गं गणपतये नमः। एकदन्ताय विद्महे वक्रतुण्डाय धीमहि तन्नो दन्ती प्रचोदयात्। एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम्। अभयं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम्। रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम्। रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम्। भक्तानुकम्पिनं देवं जगत्कारणमच्युतम्। आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम्। एवं ध्यायति यो नित्यं स योगी योगिनां वरः। नमो व्रातपतये। नमो गणपतये। नमः प्रमथपतये। नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्नविनासिने शिवसुताय श्रीवरदमूर्तये नमः॥

गणेशाथर्वशीर्षपाठमाहात्म्यम्

एतदथर्वशिरो योऽधीते स ब्रह्मभूयाय कल्पते। स सर्वविघ्नैर्न बाध्यते। स सर्वतः सुखमेधते। स पञ्चमहापातकोपपातकात् प्रमुच्यते। सायमधीयानो दिवसकृतं पापं नाशयति। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायं प्रातः प्रयुञ्जानो अपापो भवति। सर्वत्राधीयानोऽपविघ्नो भवति। धर्मार्थ-काम-मोक्षं च विन्दति। इद अथर्वशीर्षमशिष्याय न देयम्। यो यदि मोहाद्दास्यति स पापीयान्भवति। सहस्रावर्तनाद्यं यं काममधीते तं तमनेन साधयेत्। अनेन गणपतिमभिषिञ्चति स वाग्मी भवति। चतुर्थ्यामनश्नन् जपति स विद्यावान्भवति। इत्यथर्वणमहावाक्यम्। ब्रह्माद्याचरणं विद्यात्। न बिभेति कदाचनेति। यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति। यो लाजैर्यजति स यशोवान्भवति स मेधावान्भवति। यो मोदकसहस्रेण यजति स वाञ्छितफलमवाप्नोति। यः साज्यसमिद्भिर्यजति स सर्वं लभते स सर्वं लभते। अष्टौ ब्राह्मणान्सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति। सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमन्त्रो भवति। महाविघ्नात् प्रमुच्यते। महापापात् प्रमुच्यते। महादोषात् प्रमुच्यते। स सर्वविद्भवति। य एवं वेद॥

ॐ भूर्भुवः स्वः गणेशाय नमः स्तुतिपाठं समर्पयामि।

देव्याथर्वशीर्षम्

ॐ सर्वे वै देवा देवीमुपतस्थुः कासि त्वं महादेवीति॥१॥ साब्रवीत्—अहं ब्रह्मस्वरूपिणी। मत्तः प्रकृतिपुरुषात्मकं जगत्। शून्यं चाशून्यं च॥२॥ अहमानन्दानानन्दौ। अहं विज्ञानाविज्ञाने। अहं ब्रह्मा ब्रह्मणीवेदितव्ये। अहं पञ्च-भूतान्यपञ्चभूतानि। अहमखिलं जगत्॥३॥ वेदोऽहमवेदोऽहम्। विद्याहमविद्याहम्। अजाहमनजाहम्। अधश्चोर्ध्वं च तिर्यक्चाहम्॥४॥ अहं रुद्रेभिः वसुभिश्चरामि। अहमादित्यैरुत विश्वदेवैः। अहं मित्रावरुणावुभौ बिभर्मि। अहमिन्द्राग्नी अहमश्विनावुभौ॥५॥ अहं सोमं त्वष्टारं पूषणं भगं दधामि। अहं विष्णुमुरुक्रमं ब्रह्माणमुत प्रजापतिं दधामि॥६॥ अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते। अहं राष्ट्री सङ्गमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्। अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वन्तः समुद्रे। य एवं वेद। स दैवीं सम्पदमाप्नोति॥७॥

ते देवा अब्रुवन्—

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्॥८॥
तामग्निवर्णां तपसा ज्वलन्ती वैरोचनीं कर्मफलेषु जुष्टाम्।
दुर्गां देवीं शरणं प्रपद्यामहेऽसुरान्नाशयित्र्यै ते नमः॥९॥
देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु॥१०॥
कालरात्रीं ब्रह्मस्तुतां वैष्णवीं स्कन्दमातरम्।
सरस्वतीमदितिं दक्षदुहितरं नमामः पावनां शिवाम्॥११॥
महालक्ष्म्यै च विद्महे सर्वशक्त्यै च धीमहि।
तन्नो देवी प्रचोदयात्॥१२॥
अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव।
तां देवा अन्वजायन्त भद्रा अमृतबान्धवः॥१३॥
कामोयोनिः कमला वज्रपाणिः गुहा हसा मातरिश्वाभ्रमिन्द्रः।
पुनर्गुहा सकला मायया च पुरूच्यैषा विश्वमातादिविद्योम्॥१४॥

एषाऽऽत्मशक्तिः। एषा विश्वमोहिनी। पाशाङ्कुशधनुर्वाणधरा। एषा श्रीमहाविद्या। य एवं वेद स शोकं तरति॥१५॥ नमस्ते अस्तु भगवति मातरस्मान् पाहि सर्वतः॥१६॥

सैषाष्टौ वसवः। सैषैकादश रुद्राः। सैषा द्वादशादित्याः। सैषा विश्वेदेवाः सोमपा असोमपाश्च। सैषा यातुधाना असुररक्षांसि पिशाचाः यक्षाः सिद्धाः। सैषा प्रजापतीन्द्र-मनवः। सैषा ग्रहनक्षत्रज्योतींषि। कलाकाष्ठादिकालरूपिणी। तामहं प्रणौमि नित्यम्॥१७॥

पापापहारिणीं देवीं भुक्तिमुक्तिप्रदायिनीम्।
अनन्तां विजयां शुद्धां शरण्यां शिवदां शिवाम्॥१८॥
वियदीकारसंयुक्तं वीतिहोत्रसमन्वितम्।
अर्धेन्दुलसितं देव्या बीजं सर्वार्थसाधकम्॥१९॥
एवमेकाक्षरं ब्रह्म यतयः शुद्धचेतसः।
ध्यायन्ति परमानन्दमया ज्ञानाम्बुराशयः॥२०॥
वाङ्माया ब्रह्मसूस्तस्मात् षष्ठं वक्त्रसमन्वितम्।
सूर्योऽवामश्रोत्रबिन्दुसंयुक्ताष्टात्तृतीयकः ॥२१॥
नारायणेन सम्मिश्रो वायुश्चाधरयुक् ततः।
विच्चे नवार्णकोऽर्णः स्यान्महदानन्ददायकः॥२२॥
हृत्पुण्डरीकमध्यस्थां प्रातःसूर्यसमप्रभाम्।
पाशाङ्कुशधरां सौम्यां वरदाभयहस्तकाम्॥२३॥
त्रिनेत्रां रक्तवसनां भक्तकामदुघां भजे।
नमामि त्वां महादेवीं महाभयविनाशिनीम्॥२४॥
महादुर्गप्रशमनीं महाकारुण्यरूपिणीम्।

यस्याः स्वरूपं ब्रह्मादयो न जानन्ति तस्मादुच्यते अज्ञेया। यस्या अन्तो न लभ्यते तस्मादुच्यते अनन्ता। यस्या लक्ष्यं नोपलक्ष्यते तस्मादुच्यते अलक्ष्या। यस्या जननं नोप लभ्यते तस्मादुच्यते अजा। एकैव सर्वत्र वर्तते तस्मादुच्यते एका। एकैव विश्वरूपिणी तस्मादुच्यते नैका। अत एवोच्यते अज्ञेयानन्तालक्ष्याजैका नैकेति॥२५॥

मन्त्राणां मातृका देवी शब्दानां ज्ञानरूपिणी।
ज्ञानानां चिन्मयातीता शून्यानां शून्यसाक्षिणी॥२६॥
यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता।
तां दुर्गां दुर्गमां देवीं दुराचारविघातिनीम्॥२७॥
नमामि भवभीतोऽहं संसारार्णवतारिणीम्।

देव्याथर्वशीर्षमाहात्म्यम्

इदमथर्वशीर्षं योऽधीते स पञ्चाथर्वशीर्षजपफलमाप्नोति। इदमथर्वशीर्षमज्ञात्वा योऽर्चां स्थापयति शतलक्षंप्रजप्त्वापि सोऽर्चासिद्धिं न विन्दति, शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः॥२८॥

दशवारं पठेद्यस्तु सद्यः पापं प्रमुच्यते।
महादुर्गाणि तरति महादेव्याः प्रसादतः॥२९॥

सायमधीयानो दिवसकृतं पापं नाशयति। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायं प्रातः प्रयुञ्जानो अपापो भवति। निशीथे तुरीयसंध्यायां जप्त्वा वाक्सिद्धिर्भवति।

नूतनायां प्रतिमायां जप्त्वा देवतासान्निध्यं भवति। प्राणप्रतिष्ठायां जप्त्वा प्राणानां प्रतिष्ठा भवति। भौमाश्विन्यां महादेवीसन्निधौ जप्त्वा महामृत्युं तरति। स महामृत्युं तरति य एवं वेद॥२९॥

ॐ भूर्भुवः स्वः पराम्बिकायै नमः स्तुतिपाठं समर्पयामि।

अनेन यथोपलब्धद्रव्येण गणेशाम्बिकापूजनेन गणेशाम्बिके प्रीयेतां न मम॥

श्रीगणेशाम्बिकापूजनं परिपूर्णम्

स्वस्तिकलशस्थापनम्

सङ्कल्पः—**ॐ तत्सदद्य पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकप्रवरः अमुकनामाऽहं अमुकगोत्रोत्पन्न अमुकप्रवरान्वितं शुक्लयजुर्वेदान्तर्गत वाजसनेयमाध्यान्दिनीयशाखाध्यायिनममुक शर्माणं ब्राह्मणं अस्मिन् स्वर्णाकर्षणभैरव-प्रयोगकर्मणि स्वस्तिकलशपूजनं करिष्ये।**

भूमिस्पर्श—**ॐ महीद्यौः पृथिवीचनऽइमंय्यज्ञंमिमिक्षताम्।। पिपृतान्नोभरीमभिः।।**

सप्तधान्य बिखेरना—**ॐ ओषधयः समवदन्तसोमेनसहराज्ञा।। यस्मैकृणोतिब्राह्मण-स्तꣳराजन्पारयामसि।।**

कलशस्थापन—**ॐ आजिघ्रकलशंमह्यात्वाविशन्त्विन्दवः।। पुनरूर्ज्जानिवर्तस्व-सानः सहस्रंधुक्ष्वोरुधारापयस्वतीपुनर्म्माविशताद्रयिः।।**

कलश में जल भरना—**ॐ वरुणस्योत्तम्भनमसिवरुणस्यस्कम्भसर्ज्जनीस्थोवरुणस्यऽ-ऋतसदन्यसिवरुणस्यऽऋतसदनमसिवरुणस्यऽऋतसदनमासीद।**

कलश में गन्ध डाले—**ॐ त्वाङ्गन्धर्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः।। त्वामोषधे-सोमोराजाविद्वान्यक्ष्मादमुच्यत।।**

कलश में सर्वौषधि डाले—**ॐ याओषधीः पूर्वाजातादेवेभ्यस्त्रियुगंपुरा।। मनैनुबभ्रुणा-महꣳशतंधामानि सप्त च।।**

कलश में दूर्वा डाले—**ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषः परुषस्परि।। एवानोदूर्वे-प्प्रतनुसहस्रेण शतेन च।।**

कलश में पञ्चपल्लव डाले—**ॐ अश्वत्थेवोनिषदनंपर्णेवोवसतिष्कृता।। गोभाजइ-इत्किलासथयत्सनवथपूरुषम्।।**

कलश में कुश डाले—**ॐ पुवित्रैस्त्थोवैष्ष्णुव्यौसवितुर्व्वः प्प्रसुवऽउत्पुनाम्म्यच्छिद्द्रेण पुवित्रैणसूर्य्यस्यरुश्मिम्भिः॥ तस्यतेपुवित्रपतेपुवित्रपूतस्युयत्कामःपुनेतच्छकेयम्॥**

कलश में सप्तमृत्तिका डाले—**ॐ स्योनापृथिविनोभवानृक्षुरानिवेशनी॥ यच्छानुः शर्म्मसुप्प्रथाः॥**

कलश में पूंगीफल डाले—**ॐ याः फुलिनीर्य्याऽअफुलाऽअपुष्प्पायाश्श्चपुष्प्पिणीः॥ बृहुस्प्पतिप्प्रसूतास्तानोमुञ्चुन्त्वᳪहंसः॥**

कलश में पञ्चरत्न डाले—**ॐ परिवाजपतिःकुविरुग्निर्हुव्यान्यक्रमीत्॥ दधुद्रत्नानि दाुशुषे॥**

कलश में हिरण्य (सुवर्णखण्ड) डाले—**ॐ हिरुण्ण्यगुर्भःसमवर्त्तताग्ग्रेभूुतस्यजातः पतिुरेकऽआसीत्॥ सदाधारपृथिवीद्यामुतेमां अस्म्मैदेुवायहुविषाविधेम्॥**

युग्मवस्त्राच्छादन—**ॐ सुजातोज्ज्योतिषासुहशर्म्मवरूथमासदुत्त्स्वः॥ वासोअग्नेविश्श्व-रूपᳪसंव्ययस्वविभावसो॥**

पूर्णपात्रस्थापन—**ॐ पूर्ण्णादर्विपरापतुसुपूर्ण्णापुनरापत॥ वुस्नेवविक्क्रीणावहाुऽइषु-मूर्ज्जᳪशतक्रतो॥**

नारिकेलफलस्थापन—**ॐ याःफुलिनीर्य्याऽअफुलाऽअपुष्प्पायाश्श्चपुष्प्पिणीः॥ बृहुस्प्पतिप्प्रसूतास्तानोमुञ्चुन्त्वᳪहंसः॥**

वरुण का ध्यान, आवाहन, पञ्चोपचारपूजन—**ॐ तत्त्वायामिब्ब्रह्मणावन्दमानुस्तदा-शास्तेयजमानोहुविर्भिः॥ अहेडमानोवरुणेहबोुध्युरुशᳪसुमानुऽआयुःप्प्रमोषीः॥**

प्रतिष्ठा—दोनों हाथ से स्पर्श करके प्रतिष्ठा करे—

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्युबृहुस्प्पतिर्य्यज्ञमिुमन्तनोुत्त्वरिष्टंय्यज्ञᳪसमिुमन्दधातु॥ विश्श्वेदेुवासऽइुहमादयन्तामो३म्प्रतिष्ठ॥

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च।
अस्यै देवत्वमर्चायै मामहेति च कश्चन॥

अस्मिन् कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकमावाहयामि स्थापयामि।

ॐ अपांपते वरुणाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

गङ्गाद्यावाहनम्—

कला कला हि देवानां दानवानां कला कलाः।
संगृह्य निर्मितो यस्मात्कलशस्तेन कथ्यते॥१॥
कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः।
मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥२॥
कुक्षौ तु सागराः सप्त सप्तद्वीपा च मेदिनी।

अर्जुनी गोमती चैव चन्द्रभागा सरस्वती॥३॥
कावेरी कृष्णवेणा च गङ्गा चैव महानदी।
तापी गोदावरी चैव माहेन्द्री नर्मदा तथा॥४॥
नदाश्च विविधा जाता नद्यः सर्वास्तथापराः।
पृथिव्यां यानि तीर्थानि कलशस्थानि तानि वै॥५॥
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः।
आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः॥६॥
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः।
अङ्गैश्च सहिताः सर्वे कलशाम्बुं समाश्रिताः॥७॥
अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा।
आयान्तु देवपूजार्थं दुरितक्षयकारकाः॥८॥

स्वस्तिकलशपूजनम्

ध्यानम्—दोनों हाथों से पुष्प लेकर वरुणादि देवताओं का ध्यान करे—

ॐ सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात्॥ सभूमिꣳ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥ ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः ध्यानार्थे पुष्पाणि समर्पयामि।

आसनम्—दोनों हाथों से अक्षत लेकर, आसन का ध्यान कर समर्पित करे—

ॐ पुरुषऽएवेदꣳ सर्वंय्यद्भूतंयच्चभाव्यम्॥ उतामृतत्त्वस्येशानोयदन्नेनातिरोहति॥ ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः आसनार्थे अक्षतान् समर्पयामि।

पाद्यम्—दोनों हाथों से पाद्यपात्र लेकर समर्पित करे—

ॐ एतावानस्यमहिमातोज्ज्यायाँश्श्चपूरुषः॥ पादोऽस्यविश्श्वाभूतानित्रिपादस्यामृतन्दिवि॥ ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः पादयोः पाद्यं समर्पयामि।

अर्घ्यम्—दोनों हाथों से अर्घ्यपात्र लेकर समर्पित करे—

ॐ त्रिपादूर्द्ध्वऽउदैत्पुरुषः पादोऽस्येहाभवत्पुनः॥ ततोविष्ष्वङ्व्यक्क्रामत्साशनानशनेऽअभि॥ ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः अर्घ्यं समर्पयामि।

आचमनम्—दोनों हाथों से आचमनीयपात्र लेकर समर्पित करे—

ॐ ततोविराडजायतविराजोऽअधिपूरुषः॥ सजातोऽअत्यरिच्च्यतपश्श्चाद्भूमि मथोपुरः॥ ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः आचमनार्थे गङ्गोदकं समर्पयामि।

स्नानीयम्—दोनों हाथों से स्नानीयपात्र लेकर समर्पित करे—

ॐ तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्ज्यम्॥ पशूँस्ताँश्श्चक्क्रेवायव्व्यानारण्याग्राम्म्याश्श्चये॥ ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः स्नानीयं जलं समर्पयामि।

पुनराचमनीयम्—दोनों हाथों से आचमनीय जल लेकर समर्पित करे—

ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः सामानिजज्ञिरे॥ छन्दाᳬसिजज्ञिरेतस्माद्यजुस्तस्माद-जायत॥ ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः पुनराचमनार्थे गङ्गोदकं समर्पयामि।

पयःस्नानम्—दोनों हाथ से पयः पात्र लेकर समर्पित करे—

ॐ पयः पृथिव्यांपयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः॥ पयस्वतीः प्रदिशः सन्तु-मह्यम्॥ ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः पयःस्नानं समर्पयामि।

दधिस्नानम्—दोनों हाथों से दधिपात्र लेकर समर्पित करे—

ॐ दधिक्राव्णोऽअकारिषंजिष्णोरश्वस्यवाजिनः॥ सुरभिनोमुखाकरत्प्रणऽआयूᳬ-षितारिषत्॥ ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः दधिस्नानं समर्पयामि।

घृतस्नानम्—दोनों हाथों से घृतपात्र लेकर समर्पित करे—

ॐ घृतम्मिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतम्वस्यधाम॥ अनुष्ष्वधमावहमादयस्व स्वाहाकृतंवृषभवक्षिहव्यम्॥ ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः घृतस्नानं समर्पयामि।

मधुस्नानम्—दोनों हाथों से मधुपात्र लेकर समर्पित करे—

ॐ मधुवाताऽऋतायतेमधुक्षरन्तिसिन्धवः॥ माद्ध्वीर्न्नः सन्त्वोषधीः॥ मधुनक्तमुतो-षसोमधुमत्पार्थिवᳬरजः॥ मधुद्यौरस्तुनः पिता॥ मधुमान्नोवनस्पतिर्म्मधुमाँऽअस्तुसूर्य्यः॥ माद्ध्वीर्ग्गावोभवन्तुनः॥ ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः मधुस्नानं समर्पयामि।

शर्करास्नानम्—दोनों हाथों से शर्करापात्र लेकर समर्पित करे—

ॐ अपाᳬरसमुद्वयसᳬसूर्य्येसन्तᳬसमाहितम्॥ अपाᳬरसस्ययोरसस्तंवोगृह्णा म्म्युत्तममुपयामगृहीतोऽसीन्द्रायत्त्वाजुष्टंगृह्णाम्म्येषतेयोनिरिन्द्रायत्वाजुष्टतमम्॥ ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः शर्करास्नानं समर्पयामि।

पञ्चामृतस्नानम्—दोनों हाथों से पञ्चामृतपात्र लेकर समर्पित करे—

ॐ पञ्चनद्यः सरस्वतीमपियन्तिसस्रोतसः॥ सरस्वतीतुपञ्चधासोदेशेभवत्सरित्॥ ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः मिलितपञ्चामृतस्नानं समर्पयामि।

शुद्धोदकस्नानम्—दोनों हाथों से जलपात्र लेकर समर्पित करे—

ॐ शुद्धवालः सर्वशुद्धवालोमणिवालस्तऽआश्विनाः श्येतः श्येताक्षोरुणस्तेरुद्राय पशुपतयेकर्ण्णायामाऽअवलिप्तारौद्रानभोरूपाः पार्ज्जन्याः॥ ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः शुद्धोदकस्नानं समर्पयामि।

वस्त्रनिवेदनम्—दोनों हाथों से वस्त्र लेकर समर्पित करे—

ॐ तस्मादश्श्वाऽअजायन्तयेकेचोभयादतः॥ गावोहजज्ञिरेतस्म्मात्तस्म्माज्जाताऽअजावयः॥ ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः वस्त्रं समर्पयामि।

वस्त्रान्ते आचमनीयजलम्—दोनों हाथों से आचमनीय लेकर समर्पित करे—

ॐ आपोहिष्ठामयोभुवस्तानऽऊर्जेदधातन॥ महेरणायचक्षसे॥ ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः वस्त्रान्ते आचमनीयं जलं समर्पयामि।

उपवस्त्रनिवेदनम्—दोनों हाथों से उपवस्त्र लेकर समर्पित करे—

ॐ तंय्यज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्ग्रतः॥ तेनदेवाऽअयजन्तसाध्याऽऋषयश्श्चये॥ ॐ सुजातोज्योतिषासहशर्म्मवरूथमासदत्स्वः॥ वासोअग्नेविश्श्वरूपᳬसंव्ययस्वविभावसो॥ ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः उपवस्त्रं समर्पयामि।

उपवस्त्रान्ते आचमनीयजलम्—दोनों हाथों से आचमनीय जल लेकर समर्पित करे—

ॐ योवःशिवतमोरसस्तस्यभाजयतेहनः॥ उशतीरिव मातरः॥ ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः उपवस्त्रान्ते आचमनीयं समर्पयामि।

यज्ञोपवीतनिवेदनम्—दोनों हाथों से यज्ञोपवीत लेकर समर्पित करे—

ॐ यत्पुरुषंव्व्यदधुःकतिधाव्व्यकल्पयन्॥ मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्च्येते॥ ॐ यज्ञोदेवानाम्प्रत्त्येतिसुम्म्नमादित्त्यासोभवतामृडयन्तः॥ आवोर्वाचीसुमतिर्व्ववृत्त्यादᳬहोश्चिद्यावरिवोवित्तरासदादित्त्येब्भ्यस्त्वा॥ ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः यज्ञोपवीतं समर्पयामि।

यज्ञोपवीतान्ते आचमनीयम्—दोनों हाथों से आचमनीय लेकर समर्पित करे—

ॐ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्न्वथ॥ आपोजनयथा च नः॥ ॐ भूर्भुवः स्वः वरुणाद्यावाहितदेवताभ्यो नमः यज्ञोपवीतान्ते आचमनीयं समर्पयामि।

इदमाचमनीयं स्वाचमनीयम्। आचमनीय जल प्रदान करे।

इदं ऋतुफलं सुफलम्। ऋतुफल प्रदान करे।

इदमाचमनीयं स्वाचमनीयम्। आचमनीय जल प्रदान करे।

इदं ताम्बूलं सुताम्बूलम्। ताम्बूल प्रदान करे।

एषा दक्षिणा सुदक्षिणा। दक्षिणा प्रदान करे।

इदं पुष्पाञ्जलि सुपुष्पाञ्जलि। पुष्पाञ्जलि प्रदान करे।

गन्धाद्यार्चनदानम्—

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धपुष्पधूपदीपनैवेद्यदक्षिणाद्यार्चनं स्वाहा सम्पद्यतां वृद्धिः। (ऊपर के दोनों मोटकों पर गन्धाद्यार्चन प्रदान करे।)

ॐ अमुक (अपना गोत्र उच्चारित करे) **गोत्रा अस्मन्मातृपितामहीप्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः इदं गन्धपुष्पधूपदीपनैवेद्यदक्षिणाद्यार्चनं स्वाहा सम्पद्यतां वृद्धिः।** (नीचे दाहिने के तीनो मोटकों पर गन्धाद्यार्चन प्रदान करे।)

ॐ अमुक (अपना गोत्र उच्चारित करे) **गोत्र अस्मत् पितृपितामहप्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धपुष्पधूपदीपनैवेद्यदक्षिणाद्यार्चनं स्वाहा सम्पद्यतां वृद्धिः।** (नीचे मध्य के तीनो मोटकों पर गन्धाद्यार्चन प्रदान करे।)

ॐ अमुक (अपने नाना का गोत्र उच्चारित करे) **गोत्र अस्मन्मातामहप्रमातामह वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धपुष्पधूपदीपनैवेद्यदक्षिणाद्यार्चनं स्वाहा सम्पद्यतां वृद्धिः।** (नीचे बाये के तीनो मोटकों पर गन्धाद्यार्चन प्रदान करे।)

भोजननिष्क्रयदानम्—चारो स्थानों पर भोजन का युग्म मूल्य समर्पित करे—

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्मब्राह्मण भोजनपर्याप्ताऽऽमान्ननिष्क्रयभूतं द्रव्यं अमृतरूपेण स्वाहा सम्पद्यतां वृद्धिः। (ऊपर के दोनों मोटकों पर भोजननिष्क्रय प्रदान करे।)

ॐ अमुक (अपना गोत्र उच्चारित करे) **गोत्रा अस्मन्मातृपितामहीप्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः इदं युग्मब्राह्मणभोजनपर्याप्ताऽऽमान्ननिष्क्रयभूतं द्रव्यं अमृतरूपेण स्वाहा सम्पद्यतां वृद्धिः।** (नीचे दाहिने के तीनो मोटकों पर भोजननिष्क्रय प्रदान करे।)

ॐ अमुक (अपना गोत्र उच्चारित करे) **गोत्र अस्मत् पितृपितामहप्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्मब्राह्मणभोजनपर्याप्ताऽऽमान्ननिष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः।** (नीचे मध्य के तीनो मोटकों पर भोजननिष्क्रय प्रदान करे।)

ॐ अमुक (अपने नाना का गोत्र उच्चारित करे) **गोत्र अस्मन्मातामहप्रमातामह-वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्मब्राह्मणभोजन पर्याप्ताऽऽमान्ननिष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः।** (नीचे बाये के तीनो मोटकों पर भोजननिष्क्रय प्रदान करे।)

सक्षीरयवमुदकदानम्—अर्घ्यपात्र में दूध-जौ-जल मिश्रित करके प्रदान करे—

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः प्रीयन्ताम्। (ऊपर के दोनों मोटकों पर दूधजौजलमिश्रण प्रदान करे।)

ॐ अमुक (अपना गोत्र उच्चारित करे) **गोत्रा अस्मन्मातृपितामहीप्रपितामह्यः नान्दीमुख्यः प्रीयन्ताम्।** (नीचे दाहिने के तीनो मोटकों पर दूधजौजलमिश्रण प्रदान करे।)

ॐ अमुक (अपना गोत्र उच्चारित करे) **गोत्र अस्मत् पितृपितामहप्रपितामहाः नान्दीमुखाः प्रीयन्ताम्।** (नीचे मध्य के तीनो मोटकों पर दूधजौजलमिश्रण प्रदान करे।)

ॐ अमुक (अपने नाना का गोत्र उच्चारित करे) **गोत्र अस्मन्मातामहप्रमातामह-वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः प्रीयन्ताम्।** (नीचे बाये के तीनो मोटकों पर दूधजौजलमिश्रण प्रदान करे।)

उत्तरपूजनम्—चारों जगहों पर जल, पुष्प तथा अक्षत समर्पित करे—

शिवा आपः सन्तु। बोलकर जल प्रदान करे।

सौमनस्यमस्तु। बोलकर पुष्प प्रदान करे।

अक्षतं चारिष्टं चास्तु। बोलकर अक्षत प्रदान करे।

अघोरकरणम्—चारों जगहों पर पूर्वाग्र जलधारा प्रदान करे—

ॐ अघोराः पितरः सन्तु।

दक्षिणादानम्—सभी के लिए आसनों पर दक्षिणा प्रदान करे—

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठा-सिद्ध्यर्थं द्राक्षाऽऽमलकयवमूलनिष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे। (ऊपर के दोनों मोटकों पर दक्षिणा प्रदान करे।)

ॐ अमुक (अपना गोत्र उच्चारित करे) **गोत्रा अस्मन्मातृपितामहीप्रपितामह्यः नान्दीमुख्यः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षाऽऽमलकयवमूल-निष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे।** (नीचे दाहिने के तीनो मोटकों पर दक्षिणा प्रदान करे।)

ॐ अमुक (अपना गोत्र उच्चारित करे) **गोत्र अस्मत् पितृपितामहप्रपितामहाः नान्दीमुखाः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षाऽऽमलकयवमूल-निष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे।** (नीचे मध्य के तीनो मोटकों पर दक्षिणा प्रदान करे।)

ॐ अमुक (अपने नाना का गोत्र उच्चारित करे) **गोत्र अस्मन्मातामह प्रमातामह-वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः कृतस्यनान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षाऽऽमलकयवमूलनिष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे।** (नीचे बाये के तीनो मोटकों पर दक्षिणा प्रदान करे।)

यजमान प्रार्थना करे—यजमान अपने पितरों से हाथ जोड़ कर प्रर्थना करे—

ॐ गोत्रन्नो वर्धतां दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च।
श्रद्धा च नो मा व्यगमद् बहुदेयं च नोऽस्तु॥
अन्नं च नो बहु भवेदतिथींश्च लभेमहि।
याचितारश्च नः सन्तु मा च याचिष्मकञ्चन॥

गोत्रन्नो वर्धतां (हमारा कुल बढ़े), **दातारो नोऽभिवर्धन्तां** (उस गोत्र में दाता और भी बढ़ें), **वेदाः सन्ततिरेव च** (हमारी सन्तति ज्ञानवान् हो), **श्रद्धा च नो मा व्यगमद्** (वे सभी श्रद्धावान् हों), **बहुदेयं च नोऽस्तु** (उनके पास दान देने के लिए बहुत धन-धान्यादि हो), **अन्नं च नो बहु भवेत्** (उनके पास अन्नादि बहुत हो), **अतिथींश्च लभेमहि** (उनके पास दान लेने के लिए बहुत अतिथि आयें), **याचितारश्च नः सन्तु** (दान लेने के लिए याचक भी आयें), **मा च याचिष्मकञ्चन** (हमारे कुल में कोई भी याचक न हो)। **भावार्थ**— (हमारा कुल बढ़े, सभी दाता हों, वें अत्यधिक बढ़े, हमारे कुल की समस्त सन्तान ज्ञानवान् हों, सभी श्रद्धावान् तथा आदर करनेवाले हों, वे कभी किसी का निरादर न करें, उनकें पास अतिथि तथा याचक आयें, जिन्हें दान देकर गौरव प्राप्त करें, हमारे कुल में कोई याचक न हो।)

यजमान ब्राह्मणों से कहे—**एताः सत्या आशिषः सन्तु॥**

ब्राह्मण बोलें—**सन्त्वेताः सत्या आशिषः।**

ॐ उपास्मैगायतानरः पवमानायेन्दवे॥ अभिदेवाँ२ ॥इयंक्षते॥ ॐ इडामग्नेपुरुदꣳसꣳ- सनिंगोःशश्श्वत्तमꣳहवमानायसाध॥ स्यान्नः सूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मे॥

यजमान बोले—**नान्दीश्राद्धं सुसम्पन्नम्।**

ब्राह्मण बोलें—**सुसम्पन्नम्।**

विसर्जनम्—मातृ-पितामही-प्रपितामही, पिता-पितामह-प्रपितामह तथा सपत्नीक मातामह-प्रमातामह-वृद्धप्रमातामह के सहित आसन के ऊपर यवाक्षत छिड़ककर विसर्जन करे—

ॐ वाजेवाजेऽवतवाजिनोनोधनेषुविप्राऽअमृताऽऋतज्ञाः॥ अस्यमद्ध्वः पिबत मादयद्ध्वंतृप्तायात्तपथिभिर्देवयानैः॥ ॐ आ मा वाजस्यप्रसवोजगम्म्यादेमेद्यावापृथिवी- विश्श्वरूपे॥ आ मा गन्तां पितरामातरा चा मा सोमोऽअमृतत्वेन गम्म्यात्॥

विश्वेदेव का विसर्जजन करे—**ॐ विश्वेदेवाः प्रीयन्ताम्।**

यजमान बोले—**मयाऽऽचरिते साङ्कल्पिकेन विधिना नान्दीश्राद्धे न्यूनातिरिक्तो यो विधिः स उपविष्टब्राह्मणानां वचनात् श्रीगणेशप्रसादाच्च परिपूर्णोऽस्तु।**

ब्राह्मण बोलें—**अस्तु परिपूर्णः।**

समर्पणम्—**अनेन साङ्कल्पिकेन विधिना नान्दिश्राद्धकृतेन पितृस्वरूपीमहाविष्णुः प्रीयतां न मम।**

साङ्कल्पिकेन विधिना नान्दीश्राद्धं परिपूर्णम्

❁

आचार्यादिवरणम्

वरण सामग्री के पूजन के साथ सर्वप्रथम आचार्य का पूजन करके वरण के पश्चात् ब्रह्मादि का पूजन वरण करे।

ॐ वरणसामग्रीभ्यो नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

एकतन्त्रेण आचार्यादिब्राह्मणानां वरणानि—यजमान सङ्कल्प बोले—

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकप्रवरः अमुकनामाऽहं अमुकगोत्रोत्पन्न अमुकप्रवरान्वितं शुक्लयजुर्वेदान्तर्गत वाजसनेयमाध्यान्दिनीयशाखाध्यायिनममुक शर्माणं ब्राह्मणं अस्मिन् स्वर्णाकर्षण-भैरवप्रयोगकर्मणि एभिः करोपस्थितवरणद्रव्यैः आचार्यत्वेन ब्रह्मात्वेन उपद्रष्टात्वेन गाणपत्यत्वेन सदस्यत्वेन ऋत्विक्त्वेन युष्मान् वृणे।**

आचार्यादि बोलें—**वृताः स्मः।**

आचार्यादिवरण शास्त्रानुसार अलग अलग ही करना चाहिए।

आचार्यवरणम्—यजमान सङ्कल्प बोले—

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकप्रवरः अमुकनामाऽहं अमुकगोत्रोत्पन्न अमुकप्रवरान्वितं शुक्लयजुर्वेदान्तर्गत वाजसनेयमाध्यान्दिनीयशाखाध्यायिनममुक शर्माणं ब्राह्मणं अस्मिन् स्वर्णाकर्षण-भैरवप्रयोगकर्मणि एभिः करोपस्थितवरणद्रव्यैः आचार्यत्वेन त्वामहं वृणे।**

प्रार्थना—हाथ जोड़ करके यजमान प्रार्थना करे—

आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः।
तथा त्वं मम यज्ञेस्मिन्नाचार्यो भव सुव्रत!॥

आचार्य बोलें—**वृतोऽस्मि।**

ब्रह्मावरणम्—यजमान सङ्कल्प बोले—

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकप्रवरः अमुकनामाऽहं अमुकगोत्रोत्पन्न अमुकप्रवरान्वितं शुक्लयजुर्वेदान्तर्गत वाजसनेयमाध्यान्दिनीयशाखाध्यायिनममुक शर्माणं ब्राह्मणं अस्मिन् स्वर्णाकर्षण-भैरवप्रयोगकर्मणि एभिः करोपस्थितवरणद्रव्यैः ब्रह्मत्वेन त्वामहं वृणे।**

प्रार्थना—हाथ जोड़ करके यजमान प्रार्थना करे—

यथा चतुर्मुखोब्रह्मा सर्वलोकपितामहः।
तथा त्वं मम यज्ञेऽस्मिन् ब्रह्माभव द्विजोत्तम!॥

ब्रह्मा बोलें—**वृतोऽस्मि।**

उपद्रष्टावरणम्—यजमान सङ्कल्प बोले—

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकप्रवरः अमुकनामाऽहं अमुकगोत्रोत्पन्न अमुकप्रवरान्वितं शुक्लयजुर्वेदान्तर्गत वाजसनेयमाध्यान्दिनीयशाखाध्यायिनममुक शर्माणं ब्राह्मणं अस्मिन् स्वर्णाकर्षण-भैरवप्रयोगकर्मणि एभिः करोपस्थितवरणद्रव्यैः उपद्रष्टात्वेन त्वामहं वृणे।**

प्रार्थना—हाथ जोड़ करके यजमान प्रार्थना करे—

भगवन् सर्वधर्मज्ञ सर्वधमपरायण!।
वितते मम यज्ञेऽस्मिन्नुपद्रष्टा भव द्विज!॥

उपद्रष्टा बोलें—**वृतोऽस्मि।**

गाणपत्यवरणम्—यजमान सङ्कल्प बोले—

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकप्रवरः अमुकनामाऽहं अमुकगोत्रोत्पन्न अमुकप्रवरान्वितं शुक्लयजुर्वेदान्तर्गत वाजसनेयमाध्यान्दिनीयशाखाध्यायिनममुक शर्माणं ब्राह्मणं अस्मिन् स्वर्णाकर्षण-भैरवप्रयोगकर्मणि एभिः करोपस्थितवरणद्रव्यैः गाणपत्यत्वेन त्वामहं वृणे।**

प्रार्थना—हाथ जोड़ करके यजमान प्रार्थना करे—

वाञ्छितार्थफलावाप्त्यै पूजितोऽसि सुराऽसुरैः।
निर्विघ्नं क्रतुसंसिद्ध्यै त्वामऽहं गणपं वृणे॥

गणप बोलें—**वृतोऽस्मि।**

सदस्यवरणम्—यजमान सङ्कल्प बोले—

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकप्रवरः अमुकनामाऽहं अमुकगोत्रोत्पन्न अमुकप्रवरान्वितं शुक्लयजुर्वेदान्तर्गत वाजसनेयमाध्यान्दिनीयशाखाध्यायिनममुक शर्माणं ब्राह्मणं अस्मिन् स्वर्णाकर्षण-भैरवप्रयोगकर्मणि एभिः करोपस्थितवरणद्रव्यैः सदस्यत्वेन त्वामहं वृणे।**

प्रार्थना—हाथ जोड़ करके यजमान प्रार्थना करे—

भगवन् सर्वधर्मज्ञ सर्वधर्मभृतां वर।
वितते मम यज्ञेऽस्मिन् सदस्यो भव सुव्रत!॥

सदस्य बोलें—**वृतोऽस्मि**। अधिक सदस्य हों, तो **वृतास्मः** बोले। ब्राह्मण सङ्ख्या के अनुसार सङ्कल्प और प्रार्थना में उह कर लेना चाहिये।

ऋत्विक्वरणम्—यजमान सङ्कल्प बोले—

सङ्कल्पः—**पूर्वोच्चारितग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकप्रवरः अमुकनामाऽहं अमुकगोत्रोत्पन्न अमुकप्रवरान्वितं शुक्लयजुर्वेदान्तर्गत वाजसनेयमाध्यान्दिनीयशाखाध्यायिनममुक शर्माणं ब्राह्मणं अस्मिन् स्वर्णाकर्षण-भैरवप्रयोगकर्मणि एभिः करोपस्थितवरणद्रव्यैः ऋत्विक्त्वेन त्वामहं वृणे।**

प्रार्थना—हाथ जोड़ करके यजमान प्रार्थना करे—

भगवन् सर्वधर्मज्ञ सर्वधर्मपरायण!।
वितते मम यज्ञेऽस्मिन्नृत्विक्त्वं मे मखे भव॥

ऋत्विक बोले—**वृतोऽस्मि।**

नियमनिवेदनम्—यजमान हाथ जोड़ करके सभी ब्राह्मणों से निवेदन करे—

अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः।
ग्रहध्यानरताः नित्यं प्रसन्नमनसः सदा॥१॥
अदुष्टभक्षणाः सन्तु मा सन्तु परनिन्दकाः।
ममापि नियमा ह्येते भवन्तु भवतामपि॥२॥
ऋत्विजश्च यथा पूर्वं शक्रादीनां मखेऽभवन्।
यूयं तथा मे भवत ऋत्विजो द्विजसत्तमाः॥३॥
अस्मिन् कर्मणि ये विप्राः वृता गुरुमुखादयः।
सावधानाः प्रकुर्वन्तु स्वं स्वं कर्म यथोदितम्॥४॥
अस्य यागस्य निष्पत्तौ भवन्तोऽभ्यर्थिता मया।
सुप्रसन्नैः प्रकर्तव्यं कर्मेदं विधिपूर्वकम्॥५॥

यजमान बोले—**यथा विहितं कुरुध्वम्।**

सभी विप्र बोलें—**यथा ज्ञानं करवामः।**

आचार्यादिवरणं परिपूर्णम्

❁

रक्षोघ्नकर्मम्

आचार्य आचमन-प्राणायाम करके सङ्कल्प पूर्वक दिग्रक्षण करे—

सङ्कल्पः—ॐ **विष्णुः-विष्णुः-विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्रीब्रह्मणोऽह्नि द्वितीयपरार्द्धे विष्णुपदे श्रीश्वेतवाराहकल्पे वैवस्वत-मन्वन्तरे अष्टाविंशतितमे युगे कलियुगे कलिप्रथमचरणे भूर्लोके भारतवर्षे भरतखण्डे आर्यावर्तैकदेशे अमुकक्षेत्रे**(यदि वाराणसी में अनुष्ठान कर रहे हो तो **वाराणसीक्षेत्रे महाश्मशाने त्रिकंटकविराजिते भागीरथ्याः पश्चिमे तीरे**) **विक्रमशके बौद्धावतारे अमुकनामसंवत्सरे अमुकायने अमुकऋतौ महामाङ्गल्यप्रदमासोत्तमे मासे पुण्यपवित्रमासे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते श्रीचन्द्रे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते श्रीदेवगुरौ शेषेषु ग्रहेषु यथा-यथा राशिस्थानस्थितेषु सत्सु एवं ग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकप्रवरः अमुकशर्मा नामाऽहं अस्मिन् स्वर्णाकर्षण-भैरवप्रयोगकर्मणि अमुकगोत्र नामधेय यजमानेन वृतोऽहम् आचार्य कर्म करिष्ये।**
आचार्य पीली सरसों से रक्षोघ्न कर्म करे।

ॐ रक्षोहणंव्वलगहनंव्वैष्णवीमिदमहंतंव्वलगमुत्किरामियंमेनिष्ट्योयममात्योनिच-खानेदमहंतंव्वलगमुत्किरामियंमेंसमानोयमसमानोनिचखानेदमहंतंव्वलगमुत्किरामियंमे-सबन्धुर्यमसबन्धुर्निचखानेदमहंतंव्वलगमुत्किरामियम्मेंसजातोयमसजातोनिचखा-नोत्कृत्यांकिरामि॥१॥ आचार्य पूर्व दिशा में पीली सरसों का प्रक्षेप करे।

ॐ रक्षोहणौवोवलगहनः प्रोक्षामिवैष्णवान्रक्षोहणौवोवलगहनोऽवनयामिवैष्ण-वान्रक्षोहणौवोवलगहनोऽवस्तृणामिवैष्णवान्रक्षोहणौवांवलगहनाऽउपदधामिवैष्णवी-रक्षोहणौ वां वलगहनौपर्य्यूहामिवैष्णवीवैष्णवमसिवैष्णवास्थ॥२॥ आचार्य दक्षिण दिशा में पीली सरसों का प्रक्षेप करे।

ॐ रक्षसांभागोऽसिनिरस्तः रक्षऽइदमहः रक्षोऽभितिष्ठामीदमहः रक्षोऽवबाधऽइदमः-रक्षोऽधमन्तमोनयामि॥ घृतेनद्यावापृथिवीप्रोर्णुवाथांवायोवेस्तोकानामग्निराज्ज्यस्यवेतुस्वाहा-स्वाहाकृतेऽऊर्ध्वनभसम्मारुतङ्गच्छतम्॥३॥ आचार्य पश्चिम दिशा में पीली सरसों का प्रक्षेप करे।

ॐ रक्षोहाविश्वचर्षणिरभियोनिमयोहते॥ द्रोणेसधस्थमासदत्॥४॥ आचार्य उत्तर दिशा में पीली सरसों का प्रक्षेप करे।

ॐ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा।
स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु॥
ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया॥
ॐ अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्।
सर्वेषामविरोधेन पूजाकर्म समारभे॥
ॐ भूतानि राक्षसा वाऽपि येऽत्र तिष्ठन्ति केचन।
ते सर्वेऽप्यपगच्छन्तु पुरश्चरणं करोम्यहम्॥

ô nghãd ऊपर ऊर्ध्वदिशा में पीली सरसों का प्रक्षेप करें।

ॐ हुँ फट्। अधोदिशा भूमि पर नीचे पीली सरसों का प्रक्षेप करें।

चारो तरफ क्रोधमयी दृष्टि डालकर चारो तरफ के विघ्नों का निस्सारण करे, तथा तीन बार पैर की एड़ी से भूमि पर प्रहार करके भूमिस्थित विघ्नकर्ताओं से रक्षार्थ विघ्नों का निस्सारण करें।

रक्षोघ्नकर्म परिपूर्णम्

पञ्चगव्यकरणम्

ॐ गा॒य॒त्रीत्रि॒ष्टुब्जग॑त्यनु॒ष्टुप्प॒ङ्क्त्यासु॒ह॥ बृ॒हत्यु॒ष्णिहा॑ककु॒प्प्सू॒चीभि॑ः शम्म्यन्तु॒-त्त्वा॥ आचार्य इस मन्त्र से गोमूत्र स्थापित करें।

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥ आचार्य इस मन्त्र से गोमय मिश्रित करें।

ॐ आप्प्या॑यस्व॒समे॑तुतेवि॒श्श्वत॑ः सोम॒वृष्ण्य॑म्॥ भवा॒वाज॑स्यसङ्ग॒थे॥ आचार्य इस मन्त्र से गोदुग्ध मिश्रित करें।

ॐ द॒धि॒क्राव्ण्णो॑ऽअकारिषज्जि॒ष्णोरश्श्व॑स्यवा॒जिन॑ः॥ सुरभिनो॒मुखा॑कर॒त्त्प्रण॒ऽआयू॑ᳬं᳚षितारिषत्॥ आचार्य इस मन्त्र से दही मिश्रित करें।

ॐ तेजो॑ऽसिशु॒क्क्रम॑स्य॒ऽमृत॑मसि॒धाम॒नामा॑ऽसिप्प्रि॒यं॑दे॒वाना॒मना॑धृष्ट्टन्देव॒यज॑नमसि॥ आचार्य इस मन्त्र से गोघृत मिश्रित करें।

ॐ दे॒वस्य॑त्वासवि॒तुः प्प्रस॒वे॒ऽश्श्विनो॑र्बा॒हुभ्या॑म्पू॒ष्ण्णोहस्ता॑भ्याम्॥ इस मन्त्र से कुशोदक मिश्रित करके यज्ञकाष्ठ से आलोडित करें।

ॐ आपो॒हिष्ठ्ठाम॑यो भु॒वस्तान॑ऽऊ॒र्ज्जेद॑धातन॥ म॒हेरणा॑य॒चक्ष॑से॥ योव॑ः शि॒वत॑मो॒-रस॒स्तस्य॑भाजयते॒हन॑ः॥ उ॒श॒तीरि॑वमा॒तर॑ः॥ तस्म्मा॒ऽअर॑ङ्गमामवो॒यस्य॒क्षया॑य॒जिन्न्व॑थ॥ आपो॑ज॒नय॑थाचन॑ः॥

पञ्चगव्य निर्माण के बाद अपवित्रः पवित्रोवा० मन्त्र से तीन बार यज्ञभूमि तथा यज्ञ-सामग्री का मार्जन प्रोक्षण करें फिर अञ्जलि बनाकर स्वस्त्यवाचन दो बार करें।

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

ॐ स्व॒स्तिन॒ऽइन्द्रो॑वृ॒द्धश्र॑वाः स्व॒स्तिन॑ः पू॒षावि॒श्श्ववे॑दाः॥ स्व॒स्तिन॒स्तार्क्ष्यो॒ऽअरि॑ष्ट्ट-नेमिः स्व॒स्तिनो॒बृह॒स्प्पति॑र्दधातु॥ इस मन्त्र का दो बार पाठ करें।

देवाः आयान्तु॥ यातुधानाः अपयान्तु॥ विष्णोर्देव भूम्यमिमं रक्षस्व॥

पञ्चगव्यकरणं परिपूर्णम्

❁

सर्वतोभद्रदेवतानां स्थापनम्

किसी चौकोर चौकी पर कपडा बिछाकर अष्टादश कोष्ठक बनाकर चित्रानुसार विभिन्न रंगों से रञ्जित चावलादि रखकर उस पर नियत स्थान पर सुपाड़ी रखकर सर्वतोभद्रमण्डल के देवताओं का आवाहन-स्थापन पूजन करे।

सङ्कल्पः—**ॐ तत्सदद्य पूर्वोच्चारितग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकनामाऽहं अस्मिन् स्वर्णाकर्षणभैरवप्रयोगकर्मणि सर्वतोभद्रदेवतानां स्थापनं करिष्ये।**

सर्वतोभद्रदेवतानां आवहन-स्थापनम्

ब्रह्मावाहनम्—ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोव्वेनऽआवः ॥ सबुद्ध्न्या उपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्चविवः ॥ ॐ भूर्भुवः स्वः ब्रह्मणे नमः ब्रह्माणमावाहयामि स्थापयामि।

सोमावाहनम्—ॐ व्वयꣳसोमव्व्रतेतवमनस्तनूषुबिब्भ्रतः ॥ प्रजावन्तःसचेमहि॥ ॐ भूर्भुवः स्वः सोमाय नमः सोममावाहयामि स्थापयामि।

ईशानावाहनम्—ॐ तमीशानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेव्वयम्॥ पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुरदब्धस्वस्तये॥ ॐ भूर्भुवः स्वः ईशानाय नमः ईशानमावाहयामि स्थापयामि।

इन्द्रावाहनम्—ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम्॥ ह्वयामि-शक्रंपुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्विन्द्रः॥ ॐ भूर्भुवः स्वः इन्द्राय नमः इन्द्रमावाहयामि स्थापयामि।

अग्न्यावाहनम्—ॐ त्वन्नोऽअग्नेतवदेवपायुभिर्म्मघोनोरक्षतन्न्वश्श्चवन्द्य॥ त्राता-तोकस्यतनयेगवामस्यनिमेषꣳरक्षमाणस्तवव्व्रते॥ ॐ भूर्भुवः स्वः अग्नये नमः अग्निमावाहयामि स्थापयामि।

यमावाहनम्—ॐ यमायत्त्वाङ्गिरस्वतेपितृमतेस्वाहा॥ स्वाहाघर्म्मायस्वाहाघर्म्मः-पित्रे। ॐ भूर्भुवः स्वः यमाय नमः यममावाहयामि स्थापयामि।

नैर्ऋत्यावाहनम्—ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य॥ अन्यमस्मदिच्छसातऽइत्यानमोदेविनिर्ऋतेतुब्भ्यमस्तु॥ ॐ भूर्भुवः स्वः निर्ऋतये नमः निर्ऋतिमावाहयामि स्थापयामि।

वरुणावाहनम्—ॐ तत्त्वायामिब्ब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्ब्भिः॥ अहेडमानोव्वरुणेहबोद्ध्युरुशꣳसमानऽआयुःप्प्रमोषीः॥ ॐ भूर्भुवः स्वः वरुणाय नमः वरुणमावाहयामि स्थापयामि।

वाय्वावाहनम्—ॐ आनोनियुद्भिःशतिनीभिरध्वरꣳसहस्रिणीभिरुपयाहियज्ञम्॥ व्वायोऽअस्मिन्त्सवनेमादयस्वयूयंपातस्वस्तिभिःसदानः॥ ॐ भूर्भुवः स्वः वायवे नमः वायुमावाहयामि स्थापयामि।

अष्टवस्वाहनम्—ॐ व्वसुब्भ्यस्त्वारुद्रेब्भ्यस्त्वाऽऽदित्येब्भ्यस्त्वासञ्जानाथां द्यावापृथिवीमित्रावरुणौत्वाव्वृष्ट्याव्वताम्॥ व्यन्तुव्वयोक्तꣳरिहाणामरुतांपृषतीर्गच्छव्वशा-पृश्निर्ब्भूत्वादिवंगच्छतत्तोनोव्वृष्टिमावह॥ चक्षुष्पाऽअग्नेऽसिचक्षुर्म्मेपाहि॥ ॐ भूर्भुवः स्वः अष्टवसुब्भ्यो नमः अष्टवसूनावाहयामि स्थापयामि।

एकादशरुद्रानावाहनम्—ॐ नमस्तेरुद्रमन्यवऽउतोतऽइषवेनमः॥ बाहुब्भ्यामुतते

नमः॥ ॐ भूर्भुवः स्वः एकादशरुद्रेभ्यो नमः एकादशरुद्रानावाहयामि स्थापयामि।

द्वादशादित्यावाहनम्—ॐ यज्ञोदेवानांप्रत्यैतिसुम्नमादित्यासोभवतामृडयन्तः॥ आवोऽर्वाचीसुमतिर्वृत्त्यादꣳहोश्चिद्याववरिवोवित्तरासत्॥ ॐ भूर्भुवः स्वः द्वादशादित्येभ्यो नमः द्वादशादित्यानावाहयामि स्थापयामि।

अश्विनीकुमारौ-आवाहनम्—ॐ अश्विनातेजसाचक्षुःप्प्राणेनसरस्वतीवीर्य्यम्॥ वाचेन्द्रोबलेनेन्द्रायदधुरिन्द्रियम्॥ ॐ भूर्भुवः स्वः अश्विभ्यां नमः अश्विनौ आवाहयामि स्थापयामि।

सपैतृकविश्वान्देवावाहनम्—ॐ विश्वेदेवासऽआगतशृणुताम्मऽइमꣳहवम्॥ एदंबर्हिन्निषीदत॥ उपयामगृहीतोऽसिविश्वेब्भ्यस्त्वादेवेब्भ्यऽएषतेयोनिर्विश्वेब्भ्यस्त्वादेवेब्भ्यः॥ ॐ भूर्भुवः स्वः सपैतृकविश्वेभ्यो देवेभ्यो नमः सपैतृकविश्वान्देवानावाहयामि स्थापयामि।

सप्तयक्षावाहनम्—ॐ अभित्यंदेवꣳसवितारमोण्योःकविक्क्रतुमर्च्चामिसत्त्यसवꣳरत्नधामभिप्प्रियंमतिंकविम्॥ ऊर्ध्वायस्यामतिर्भाऽअदिद्युतत्सवीमनिहिरण्यपाणिरमिमीतसुक्क्रतुःकृपास्वः॥ प्रजाब्भ्यस्त्वाप्प्रजास्त्वानुप्प्राणन्तुप्रजास्त्वमनुप्प्राणिहि॥ ॐ भूर्भुवः स्वः सप्तयक्षेभ्यो नमः सप्तयक्षानावाहयामि स्थापयामि।

सर्पावाहनम्—ॐ नमोस्तुसर्प्पेब्भ्योयेकेचपृथिवीमनु॥ येऽअन्तरिक्षेयेदिवितेब्भ्यः-सर्प्पेब्भ्योनमः॥ ॐ भूर्भुवः स्वः सर्पेभ्यो नमः सर्पानावाहयामि स्थापयामि।

गन्धर्वाऽप्सरसः-आवाहनम्—ॐ ऋताषाडृतधामाग्निर्गन्धर्वस्तस्यौषधयोप्सरसोमुदोनाम॥ सनऽइदम्ब्रह्मक्षत्रम्पातुतस्मैस्वाहावाट्ताब्भ्यःस्वाहा॥ ॐ भूर्भुवः स्वः गन्धर्वाऽप्सरोभ्यो नमः गन्धर्वाऽप्सरसः आवाहयामि स्थापयामि।

स्कन्दावाहनम्—ॐ यदक्क्रन्दःप्प्रथमंजायमानऽउद्यन्त्समुद्द्रादुतवापुरीषात्॥ श्येनस्यपक्षाहरिणस्य बाहूऽउपस्तुत्त्यंमहिजातंतेऽअर्वन्॥ ॐ भूर्भुवः स्वः स्कन्दाय नमः स्कन्दमावाहयामि स्थापयामि।

वृषभावाहनम्—ॐ आशुःशिशानोवृषभोनभीमोघनाघनःक्षोभणश्चर्षणीनाम्॥ सङ्क्रन्दनेनाऽनिमिषऽएकवीरःशतꣳसेनाऽअजयत्त्साकमिन्द्रः॥ ॐ भूर्भुवः स्वः वृषभाय नमः वृषभमावाहयामि स्थापयामि।

शूलावाहनम्—ॐ कार्षिरसिसमुद्रस्यत्त्वाक्षित्त्याऽउन्नयामि॥ समापोऽअद्भिरग्गमतसमोषधीभिरोषधीः॥ ॐ भूर्भुवः स्वः शूलाय नमः शूलमावाहयामि स्थापयामि।

महाकालावाहनम्—ॐ त्र्यम्बकंय्यजामहेसुगन्धिंपुष्टिवर्द्धनम्॥ उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमाऽमृतात्॥ ॐ भूर्भुवः स्वः महाकालाय नमः महाकालमावाहयामि स्थापयामि।

दक्षादिसप्तगणावाहनम्—ॐ शुक्रज्ज्योतिश्चचित्रज्ज्योतिश्चसत्यज्ज्योतिश्च-ज्ज्योतिष्माँश्च॥ शुक्रश्चऽऋतपाश्चात्यꣳहाः॥ ॐ भूर्भुवः स्वः दक्षादिसप्तगणेभ्यो नमः दक्षादिसप्तगणानामावाहयामि स्थापयामि।

दुर्गावाहनम्—ॐ अम्बेऽअम्बिकेऽम्बालिकेनमानयतिकश्चन॥ ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम्॥ ॐ भूर्भुवः स्वः दुर्गायै नमः दुर्गामावाहयामि स्थापयामि।

विष्ण्वाहनम्—ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्॥ समूढमस्यपाꣳसुरे स्वाहा॥ ॐ भूर्भुवः स्वः विष्णवे नमः विष्णुमावाहयामि स्थापयामि।

स्वधावाहनम्—ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः-स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः॥ अक्षन्पितरोऽमीमदन्तपितरोऽतीतृपन्त-पितरः पितरः शुन्धध्वम्॥ ॐ भूर्भुवः स्वः स्वधायै नमः स्वधामावाहयामि स्थापयामि।

मृत्युरोगानावाहनम्—ॐ परंमृत्योऽअनुपरेहिपन्थांयस्तेऽअन्यऽइतरोदेवयानात्॥ चक्षुष्मतेशृण्वतेतेब्रवीमिमानःप्रजाꣳरीरिषोमोतवीरान्॥ ॐ भूर्भुवः स्वः मृत्युरोगेभ्यो नमः मृत्युरोगानावाहयामि स्थापयामि।

गणपत्यवाहनम्—ॐ गणानान्त्वागणपतिꣳहवामहेप्रियाणान्त्वाप्रियपतिꣳहवा-महेनिधीनान्त्वानिधिपतिꣳहवामहेवसोमम॥ आहमजानिगर्भधमात्त्वमजासिगर्भधम्॥ ॐ भूर्भुवः स्वः गणपतये नमः गणपतिमावाहयामि स्थापयामि।

अपामावाहनम्—ॐ अप्स्वग्नेसधिष्टवसौषधीरनुरुध्यसे॥ गर्भेसञ्जायसेपुनः॥ ॐ भूर्भुवः स्वः अद्भ्यो नमः अपामावाहयामि स्थापयामि।

मरुतावाहनम्—ॐ मरुतोयस्यहिक्षयेपाथादिवोविमहसः॥ ससुगोपातमोजनः॥ ॐ भूर्भुवः स्वः मरुद्भ्यो नमः मरुतामावाहयामि स्थापयामि।

पृथ्वीमावाहनम्—ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी॥ यच्छानःशर्मसप्रथाः॥ ॐ भूर्भुवः स्वः पृथिव्यै नमः पृथ्वीमावाहयामि स्थापयामि।

गङ्गादिनद्यावाहनम्—ॐ पञ्चनद्यः सरस्वतीमपियन्तिसस्रोतसः॥ सरस्वतीतुपञ्च-धासोदेशेभवत्सरित्॥ ॐ भूर्भुवः स्वः गङ्गादिनदीभ्यो नमः गङ्गादीनावाहयामि स्थापयामि।

सप्तसागरावाहनम्—ॐ समुद्रोऽसिनभस्वानार्द्रदानुः॥ शम्भूर्मयोभूरभिमावाहि स्वाहा॥ मारुतोऽसिमरुतांगणः शम्भूर्मयोभूरभिमावाहिस्वाहा॥ ॐ भूर्भुवः स्वः सप्तसागरेभ्यो नमः सप्तसागरानावाहयामि स्थापयामि।

मेरुमावाहनम्—ॐ प्रपर्वतस्यवृषभस्यपृष्ठान्नावश्चरन्तिस्वसिचऽइयानाः॥ ताऽआ-ववृत्रन्नधरागुदक्ताअहिम्बुध्न्यमनुरीयमाणाः॥ विष्णोर्विक्रमणमसिविष्णोर्विक्रान्त-मसिविष्णोःक्रान्तमसि॥ ॐ भूर्भुवः स्वः मेरवे नमः मेरुमावाहयामि स्थापयामि।

गदावाहनम्—ॐ गुणानान्त्वागुणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहे निधीनान्त्वानिधिपतिꣳहवामहेव्वसोममआहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम्॥ ॐ भूर्भुवः स्वः गदायै नमः गदामावाहयामि स्थापयामि।

त्रिशूलावाहनम्—ॐ त्रिꣳशद्धामव्विराजतिव्वाक्पतङ्गायधीयते॥ प्रतिवस्तोरहद्द्युभिः॥ ॐ भूर्भुवः स्वः त्रिशूलाय नमः त्रिशूलमावाहयामि स्थापयामि।

वज्रावाहनम्—ॐ महाँ२॥इन्द्रोव्वज्रहस्तःषोडशीशर्म्मयच्छतु॥ हन्तुपाप्मानंय्योऽ-स्म्मान्द्वेष्ट्टि॥ उपयामगृहीतोऽसिमहेन्द्रायत्त्वैषतेयोनिर्म्महेन्द्रायत्वा॥ ॐ भूर्भुवः स्वः वज्राय नमः वज्रमावाहयामि स्थापयामि।

शक्तिमावाहनम्—ॐ व्वसुचमेव्वसतिश्श्चमेकर्म्मचमेशक्तिश्श्चमेऽर्त्थश्श्चमएमश्श्च इत्याचमेगतिश्श्चमेयज्ञेनकल्प्पन्ताम्॥ ॐ भूर्भुवः स्वः शक्तये नमः शक्तिमावाहयामि स्थापयामि।

दण्डावाहनम्—ॐ इडऽएह्यदितऽएहिकाम्याऽएत॥ मयिवःकामधरणंभूयात्॥ ॐ भूर्भुवः स्वः दण्डाय नमः दण्डमावाहयामि स्थापयामि।

खड्गावाहनम्—ॐ खड्गोवैश्श्वदेवःश्श्वाकृष्ष्णःकर्णोगर्हभस्तरक्षुस्तेरक्ष सामिन्द्रायसूकरःसिꣳहोमारुतःकृकलासःपिप्प्पकाशकुनिस्तेशरव्यायैविश्श्वेषांदेवानां पृषतः॥ ॐ भूर्भुवः स्वः खड्गाय नमः खड्गमावाहयामि स्थापयामि।

पाशावाहनम्—ॐ उदुत्तमंव्वरुणपाशमस्म्मदवाधमंव्विमध्यमꣳश्रथायअथाव्वयमा-दित्यव्व्रतेतवानागसोऽअदितयेस्याम॥ ॐ भूर्भुवः स्वः पाशाय नमः पाशमावाहयामि स्थापयामि।

अङ्कुशावाहनम्—ॐ अꣳशुश्श्चमेरश्मिमश्श्चमेऽदाब्भ्यश्श्चमेऽधिपतिश्श्चमऽउपाꣳ-शुश्श्चमेऽन्तर्य्यामश्श्चमऽऐन्द्रवायवश्श्चमेमैत्रावरुणश्श्चमेऽआश्श्विनश्श्चमेप्प्रतिप्प्रस्थानश्श्च-मेशुक्क्रश्श्चमेमन्थीचमेयज्ञेनकल्प्पन्ताम्॥ ॐ भूर्भुवः स्वः अङ्कुशाय नमः अङ्कुशमावाहयामि स्थापयामि।

गौतमावाहनम्—ॐ आयंगौःपृश्निरक्क्रमीदसदन्मातरंपुरः॥ पितरञ्चप्प्रयन्त्स्वः॥ ॐ भूर्भुवः स्वः गौतमाय नमः गौतममावाहयामि स्थापयामि।

भरद्वाजावाहनम्—ॐ अयंदक्षिणाव्विश्श्वकर्म्मातस्यमनोवैश्श्वकर्म्मणंग्ग्रीष्म्मोमानस-स्त्रिष्टुब्ग्रैष्म्मीत्रिष्टुभःस्वारꣳस्वारादन्तर्य्यामोऽन्तर्य्यामात्पञ्चदशःपञ्चदश हव्वरद्वाजऽ-ऋषिःप्प्रजापतिगृहीतयात्त्वयामनोगृह्णामिप्प्रजाब्भ्यः॥ ॐ भूर्भुवः स्वः भरद्वाजाय नमः भरद्वाजमावाहयामि स्थापयामि।

विश्वामित्रावाहनम्—ॐ इदमुत्तरात्स्वस्तस्यश्रोत्रꣳसौवꣳशरच्छ्रौत्र्यनुष्टुप्शारद्यनुष्टु-भऽऐडमैडान्मन्थीमन्थिनऽएकविꣳशऽएकविꣳशाद्वैराजंव्विश्श्वामित्त्रऽऋषिःप्प्रजापति-

गृहीतयात्त्वयाश्रोत्रंगृह्णामिप्प्रजाब्भ्यः॥ ॐ भूर्भुवः स्वः विश्वामित्राय नमः विश्वामित्रमावाहयामि स्थापयामि।

कश्यपावाहनम्—ॐ त्र्यायुषंजमदग्ग्नेःकश्यपस्यत्र्यायुषम्॥ यद्देवेषुत्र्यायुषंतन्नो अस्तुत्र्यायुषम्॥ ॐ भूर्भुवः स्वः कश्यपाय नमः कश्यपमावाहयामि स्थापयामि।

जमदग्न्यावाहनम्—ॐ अयंपश्श्चाद्विश्श्वव्यचास्तस्यचक्षुर्वैश्श्वव्यचसंवर्षाश्श्चाक्षुष्यो जगतीवार्षीजगत्त्याऽऋक्स्समृक्स्समाच्छुक्रश्शुक्रात्सप्प्तदशस्सप्प्तदशाद्वैरूपंजमदग्ग्निर्ऋषिः-प्प्रजापतिगृहीतयात्त्वयाचक्षुर्ग्गृह्णामिप्प्रजाब्भ्यः॥ ॐ भूर्भुवः स्वः जमदग्नये नमः जमदग्निमावाहयामि स्थापयामि।

वसिष्ठावाहनम्—ॐ अयंपुरोभुवस्तस्यप्प्राणोभौवनायनोर्वसन्तःप्प्राणयनोगायत्री-वासन्तीगायत्र्यैगायत्रंगायत्रादुपाᳬशुरुपाᳬशोस्त्रिवृत्त्रिवृतोरथान्तरंवसिष्ठऽऋषिःप्प्रजापति-गृहीतयात्वयाप्प्राणंगृह्णामिप्प्रजाब्भ्यः॥ ॐ भूर्भुवः स्वः वसिष्ठाय नमः वसिष्ठमावाहयामि स्थापयामि।

अत्र्यावाहनम्—ॐ अत्रपितरोमादयद्ध्वंय्यथाभागमावृषायद्ध्वम्॥ अमीमदन्तपितरो-य्यथाभागमावृषायिषत॥ ॐ भूर्भुवः स्वः अत्रये नमः अत्रिमावाहयामि स्थापयामि।

अरुन्धत्यावाहनम्—ॐ तंपत्नीभिरनुगच्छेमदेवाःपुत्रैर्ब्भ्रातृभिरुतवाहिरण्ण्यैः॥ नाकं-गृब्भ्णानाःसुकृतस्यलोकेतृतीयेपृष्ठेऽअधिरोचनेदिवः॥ ॐ भूर्भुवः स्वः अरुन्धत्यै नमः अरुन्धतीमावाहयामि स्थापयामि।

ऐन्द्र्यावाहनम्—ॐ अदित्यैरास्नासीन्द्राण्ण्याऽउष्ण्णीषः॥ पूषासिघर्म्मायदीष्व॥ ॐ भूर्भुवः स्वः ऐन्द्र्यै नमः ऐन्द्रीमावाहयामि स्थापयामि।

कौमार्यावाहनम्—ॐ अम्बेऽअम्बिकेऽम्बालिकेनमानयतिकश्श्चन॥ ससस्त्यश्श्वकः सुभद्रिकाङ्काम्पीलवासिनीम्॥ ॐ भूर्भुवः स्वः कौमार्य्यै नमः कौमारीमावाहयामि स्थापयामि।

ब्राहम्यावाहनम्—ॐ इन्द्रायाहिधियेषितोविप्प्रजूतःसुतावतः॥ उपब्ब्रह्माणिवाग्घतः॥ ॐ भूर्भुवः स्वः ब्राह्म्यै नमः ब्राह्मीमावाहयामि स्थापयामि।

वाराह्यावाहनम्—ॐ इन्द्रस्यक्क्रोडोऽअदित्यैपाजस्यंदिशांजत्रवोऽदित्यैभसज्जीमूता-न्हृदयौपशेनान्तरिक्षंपुरीततानभऽउदर्य्येणचक्रवाकौमतस्नाब्भ्यांदिवंवृक्काब्भ्यांगिरीन्प्लाशिभिरुपलान्प्लीह्नावल्मीकान्क्लोमभिर्ग्ग्लौभिर्ग्गुल्मान्हिराभिःस्रवन्तीर्हृदान्कुक्षिब्भ्याᳬ-समुद्रमुदरेणवैश्श्वानरंभस्मना॥ ॐ भूर्भुवः स्वः वाराह्यै नमः वाराहीमावाहयामि स्थापयामि।

चामुण्डाऽवाहनम्—ॐ अम्बेऽअम्बिकेऽम्बालिकेनमानयतिकश्श्चन॥ ससस्त्यश्श्वकः सुभद्रिकाङ्काम्पीलवासिनीम्॥ ॐ भूर्भुवः स्वः चामुण्डायै नमः चामुण्डामावाहयामि स्थापयामि।

वैष्णव्यावाहनम्—**ॐ आप्यायस्वसमैतुतेव्विश्श्वतः सोमवृष्ण्यम्॥ भवाव्वाजस्यसङ्गथे॥ ॐ भूर्भुवः स्वः वैष्णव्यै नमः वैष्णवीमावाहयामि स्थापयामि।**

माहेश्वर्यावाहनम्—**ॐ यातेरुद्रशिवातनूरघोराऽपापकाशिनी॥ तयानस्तन्न्वाशन्तमयागिरिशन्ताभिचाकशीहि॥ ॐ भूर्भुवः स्वः माहेश्वर्यै नमः माहेश्वरीमावाहयामि स्थापयामि।**

वैनायक्यावाहनम्—**ॐ समक्ख्येदेव्व्याधियासन्दक्षिणयोरुचक्षसा॥ मामऽआयुः-प्प्रमोषीर्म्मोऽअहंतवव्वीरंव्विदेयतवदेविसन्दृशि॥ ॐ भूर्भुवः स्वः वैनायक्यै नमः वैनायकीमावाहयामि स्थापयामि।**

प्रतिष्ठा—आवाहन करने के बाद हाथ से स्पर्श करके प्रतिष्ठा करे—

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टंय्यज्ञꣳसमिमन्दधातु॥ व्विश्श्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठ॥

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च।
अस्यै देवत्वमर्चायै मामहेति च कश्चन॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः सर्वतोभद्रमण्डलस्थदेवताः आवाहिताः सुप्रतिष्ठिताः वरदाः भवन्तु।

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः सर्वतोभद्रमण्डलस्थदेवताः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

सर्वतोभद्रदेवतानां स्थापनमं परिपूर्णम्

सर्वतोभद्रदेवतानां पूजनम्

सङ्कल्पः—ॐ तत्सदद्य पूर्वोच्चारितग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकनामाऽहं अस्मिन् स्वर्णाकर्षणभैरवप्रयोगकर्मणि सर्वतोभद्रदेवतानां पूजनं करिष्ये।

ध्यानम्—दोनों हाथ से पुष्प लेकर ध्यान करे—

भद्रं कल्याणकर्तृत्वं पारिषदं सर्वदेवाः।
मोदनार्थञ्च जीवानां मण्डलं परिकल्पितम्॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः ध्यानार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

आसनम्—दोनों हाथ से अक्षत लेकर आसन-ध्यान कर समर्पित करे—

विचित्र-रत्नखचितं दिव्यास्तरणसंयुतम्।
स्वर्णसिंहासनं चारु गृह्णीष्व सुरपूजित!॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः आसनार्थे अक्षतान् समर्पयामि।

पाद्यम्—दोनों हाथ से पाद्यपात्र लेकर समर्पित करे—

सर्वतीर्थसमुद्भूतं पाद्यं गन्धादिभिर्युतम्।
त्रिगुणात्मगृहाणेदं भगवान् भक्तवत्सल!॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः पादयोः पाद्यं समर्पयामि।

अर्घ्यम्—दोनों हाथ से अर्घ्यपात्र लेकर समर्पित करे—

त्रिगुणात्मन्नमस्तेऽस्तु गृहाण करुणाकर।
अर्घ्यञ्च फलसंयुक्तं गन्धमाल्याक्षतैर्युतम्॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः अर्घ्यं समर्पयामि।

आचमनीयम्—दोनों हाथ से आचमनीय जल लेकर समर्पित करे—

त्रिदेवञ्च नमस्तुभ्यं त्रिदशैरभिवन्दित।
गङ्गोदकेन देवेश कुरुष्वाचमनं प्रभो॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः आचमनार्थे गङ्गोदकं समर्पयामि।

स्नानीयम्—दोनों हाथ से स्नानीयपात्र लेकर समर्पित करे—

मन्दाकिन्यस्तु यद्वारि सर्वपापहरं शुभम्।
तदिदं कल्पितं देव स्नानार्थं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः स्नानीयं जलं समर्पयामि।

पुनराचमनीयम्—दोनों हाथ से आचमनीय जल लेकर समर्पित करे—

गङ्गोदकस्य यद्वारि सर्वं मलहरं परम्।
तदिदं समर्पितं देव पुनराचमनं शुभम्॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः पुनराचमनार्थे गङ्गोदकं समर्पयामि।

पयःस्नानम्—दोनों हाथ से पयःपात्र लेकर समर्पित करे—

कामधेनुसमुद्भूतं सर्वेषां जीवनं परम्।
पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम्॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः पयःस्नानं समर्पयामि।

दधिस्नानम्—दोनों हाथ से दधिपात्र लेकर समर्पित करे—

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्।
दध्यानीतं मया देव! स्नानार्थं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः दधिस्नानं समर्पयामि।

घृतस्नानम्—दोनों हाथ से घृतपात्र लेकर समर्पित करे—

नवनीतसमुत्पन्नं सर्वसन्तोषकारकम्।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः घृतस्नानं समर्पयामि।

मधुस्नानम्—दोनों हाथ से मधुपात्र लेकर समर्पित करे—

पुष्परेणुसमुद्भूतं सुस्वादु मधुरं मधु।
तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः मधुस्नानं समर्पयामि।

शर्करास्नानम्—दोनों हाथ से शर्करापात्र लेकर समर्पित करे—

इक्षुरससमुद्भूतां शर्करां पुष्टिदां शुभाम्।
मलापहारिकां दिव्यां स्नानार्थं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः शर्करास्नानं समर्पयामि।

पञ्चामृतस्नानम्—दोनों हाथ से पञ्चामृतपात्र लेकर समर्पित करे—

पञ्चामृतं मयाऽऽनीतं पयो दधि घृतं मधु।
शर्करा च समायुक्तं स्नानार्थं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः पञ्चामृतस्नानं समर्पयामि।

शुद्धोदकस्नानम्—दोनों हाथों से जलपात्र लेकर समर्पित करे—

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः मिलितपञ्चामृतस्नानं समर्पयामि।

शुद्धोदकस्नानम्—दोनों हाथ से जलपात्र लेकर समर्पित करे—

गङ्गा च यमुना चैव गोदावरी सरस्वती।
नर्मदा-सिन्धु-कावेरी स्नानार्थं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः शुद्धोदकस्नानं समर्पयामि।

वस्त्रनिवेदनम्—दोनों हाथ से वस्त्र लेकर समर्पित करे—

शीतवातोष्णसन्त्राणं लज्जाया रक्षणं परम्।
देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः वस्त्रोपवस्त्रं समर्पयामि। वस्त्रोपवस्त्रान्ते आचमनीयं समर्पयामि।

यज्ञोपवीतनिवेदनम्—दोनों हाथ से यज्ञोपवीत लेकर समर्पित करे—

नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम्।
उपवीतं मया दत्तं गृहाण सुरपूजित॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः यज्ञोपवीतं समर्पयामि। यज्ञोपवीतान्ते आचमनीयं समर्पयामि।

सुगन्धिद्रव्यसमर्पणम्—दोनों हाथ से सुगन्धिद्रव्य लेकर समर्पित करे—

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः गन्धानुलेपनं समर्पयामि।

अक्षतसमर्पणम्—दोनों हाथ से अक्षत लेकर समर्पित करे—

अक्षताश्च सुरश्रेष्ठा कुङ्कुमाक्ताः सुशोभिताः।
मया निवेदिता भक्त्या गृहाण परमेश्वर!॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः अलङ्करणार्थे अक्षतान् समर्पयामि।

पुष्पमालासमर्पणम्—दोनों हाथ से पुष्पमाला लेकर समर्पित करे—

माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो!।
मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः पुष्पमालां परिधापयामि।

दूर्वासमर्पणम्—दोनों हाथ से दूर्वा लेकर समर्पित करे—

दूर्वाङ्कुरान् सुहरितान् अमृतान् मङ्गलप्रदान्।
आनीतांस्तव पूजार्थं गृहाण सुरनायक!॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः दूर्वाङ्कुरान् समर्पयामि।

नानापरिमलद्रव्यसमर्पणम्—दोनों हाथ से अबीरबुक्का लेकर समर्पित करे—

अबीरं च गुलालं च चोवा चन्दनमेव च।
अबीरेणार्चितो देव अतः शान्तिं प्रयच्छ मे॥१॥
नानापरिमलैर्द्रव्यैर्निर्मितं चूर्णमुत्तमम्।
अबीरनामकं चूर्णं गन्धं चारु प्रगृह्यताम्॥२॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः नानापरिमलद्रव्याणि समर्पयामि।

सिन्दूरसमर्पणम्—दोनों हाथ से सिन्दूर लेकर समर्पित करे—

सिन्दूरं शोभनं रक्तं सौभाग्यं सुखवर्धनम्।
शुभदं कामदं चैव सिन्दूरं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः सिन्दूराभरणं समर्पयामि।

ततः नैवेद्यं पुरतः संस्थाप्य धूपदीपौ प्रज्वाल्य।

धूपसमर्पणम्—दोनों हाथ से धूपपात्र लेकर समर्पित करे—

वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः धूपं आघ्रापयामि।

दीपसमर्पणम्—दोनों हाथ से दीपपात्र लेकर समर्पित करे—

साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम्॥
भक्त्या दीपं प्रयच्छामि देवाय परमात्मने।
त्राहि मां निरयाद् घोराद् दीपज्योतिर्नमोऽस्तु ते॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः दीपज्योतिं समर्पयामि।

नैवेद्यसमर्पणम्—दोनों हाथ से नैवेद्यपात्र लेकर समर्पित करे—

नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु।
ईप्सितं मे वरं देहि परत्र च परां गतिम्॥
शर्कराखण्डखाद्यानि दधिक्षीरघृतानि च।

आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः नैवेद्यं समर्पयामि। ॐ प्राणाय स्वाहा। ॐ अपानाय स्वाहा। ॐ समानाय स्वाहा। ॐ उदानाय स्वाहा। ॐ व्यानाय स्वाहा। मध्ये पानीयं जलं उत्तरापोशनं समर्पयामि।

करोद्वर्तनसमर्पणम्—दोनों हाथ से करोद्वर्तन लेकर समर्पित करे—

चन्दनं मलयोद्भूतं कस्तूर्यादिसमन्वितम्।
करोद्वर्तनकं देव गृहाण परमेश्वर!॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेबताभ्यो नमः करोद्वर्तनार्थे चन्दनानुलेपनं समर्पयामि।

ताम्बूलादिसमर्पणम्—दोनों हाथ सें ताम्बूल लेकर समर्पित करे—

पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम्।
एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम्॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः मुखशुद्ध्यर्थे पुंगीफलएला-लवङ्गादिसहितताम्बूलपत्राणि समर्पयामि।

फलादिसमर्पणम्—दोनों हाथ से फलपात्र लेकर समर्पित करे—

इदं फलं मया देव! स्थापितं पुरतस्तव।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः ऋतुकालोद्भवफलानि समर्पयामि।

दक्षिणासमर्पणम्—दोनों हाथ से दक्षिणा लेकर समर्पित करे—

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः कृतायाः पूजायाः साद्-गुण्यार्थे द्रव्यदक्षिणां समर्पयामि।

नीराजनसमर्पणम्—दोनों हाथ से नीराजन लेकर घुमाये—

कदलीगर्भसम्भूतं कर्पूरं तु प्रदीपितम्।
आरार्तिकमहं कुर्वे पश्य मे वरदो भव॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः कर्पूरनीराजनं समर्पयामि।

पुष्पाञ्जलिसमर्पणम्—दोनों हाथ से पुष्प लेकर समर्पित करे—

नानासुगन्धिपुष्पाणि यथाकालोद्भवानि च।
पुष्पाञ्जलिर्मया दत्ता गृहाण परमेश्वर!॥

ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलस्थदेवताभ्यो नमः मन्त्रपुष्पाञ्जलिं समर्पयामि।

परिक्रमासमर्पणम्—दोनों हाथ से पुष्प लेकर समर्पित करे—

यानि कानि च पापानि जन्मान्तरकृतानि च।
तानि सर्वाणि नश्यन्ति प्रदक्षिणां पदे पदे॥१॥

पदे पदे या परिपूजकेभ्यः सद्योऽश्वमेधादिफलं ददाति।
तां सर्वपापक्षयहेतुभूतां प्रदक्षिणां ते परितः करोमि॥२॥

पूजनसमर्पणम्—दक्षिण हाथ में जल लेकर पूजनसमर्पण करे—

अनया पूजया सर्वतोभद्रमण्डलस्थदेवताः प्रीयन्ताम्।

सर्वतोभद्रमण्डल के पूजन के बाद प्रधानदेवता का पूजन करे।

सर्वतोभद्रदेवतापूजनं परिपूर्णम्

प्रधानकलशस्थापनम्

सङ्कल्पः—ॐ तत्सदद्य पूर्वोच्चारितग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकनामाऽहं अस्मिन् स्वर्णाकर्षणभैरवप्रयोगकर्मणि प्रधानकलशस्थापनं करिष्ये।

भूमिस्पर्श—ॐ महीद्यौः पृथिवीचनऽइमंय्यज्ञंमिमिक्षताम्।। पिपृतानोभरीमभिः।।

सप्तधान्य बिखेरना—ॐ ओषधयः समवदन्तसोमेनसहराज्ञा।। यस्मैकृणोति ब्राह्मणस्तꣳराजन्पारयामसि।।

कलशस्थापन—ॐ आजिघ्रकलशंमह्यात्वाविशन्त्विन्दवः।। पुनरूर्ज्जानिवर्तस्वसानः सहस्रंधुक्ष्वोरुधारापयस्वतीपुनर्म्माविशताद्रयिः।।

कलश में जल भरना—ॐ वरुणस्योत्तम्भनमसिवरुणस्यस्कम्भसर्ज्जनीस्थो वरुणस्यऽऋतसदन्यसिवरुणस्यऽऋतसदनमसिवरुणस्यऽऋतसदनमासीद।

कलश में गन्ध डाले—ॐ त्वांगन्धर्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः।। त्वामोषधे-सोमोराजाविद्वान्यक्ष्मादमुच्यत।।

कलश में सर्वौषधी डाले—ॐ याओषधीः पूर्वाजातादेवेब्भ्यस्त्रियुगंपुरा।। मनैनु-बब्भ्रुणामहꣳशतंधामानि सप्त च।।

कलश में दूर्वा डाले—ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषः परुषष्परि।। एवानोदूर्व्वे-प्प्रतनुसहस्रेण शतेन च।।

कलश में पञ्चपल्लव डाले—ॐ अश्वत्थेवोनिषदनंपर्ण्णेवोवसतिष्कृता।। गोभा-जऽइत्किलासथयत्सनवथपूरुषम्।।

कलश में कुश डाले—ॐ पवित्रेस्त्थोवैष्ष्णव्यौसवितुर्वः प्प्रसवऽउत्पुनाम्म्यच्छिद्रेण पवित्रेणसूर्य्यस्यरश्मिभिः।। तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामः पुनेतच्छकेयम्।।

कलश में सप्तमृत्तिका डाले—**ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी॥ यच्छानः-शर्म्मसप्प्रथाः॥**

कलश में पूंगीफल डाले—**ॐ याः फलिनीर्य्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः॥ बृहस्प्पतिप्प्रसूतास्तानोमुञ्चन्त्वꣳहसः॥**

कलश में पञ्चरत्न डाले—**ॐ परिवाजपतिः कविरग्ग्निर्हव्यान्यक्रमीत्॥ दधद्रत्नानि दाशुषे॥**

कलश में हिरण्य (सुवर्णखण्ड) डाले—**ॐ हिरण्यगर्भः समवर्त्तताग्ग्रेभूतस्यजातः पतिरेकऽआसीत्॥ सदाधारपृथिवीद्यामुतेमां अस्मैदेवायहविषाविधेम॥**

युग्मवस्त्राच्छादन—**ॐ सुजातोज्योतिषासहशर्म्मवरूथमासदत्स्वः॥ वासोअग्ग्ने-विश्वरूपꣳ संव्ययस्वविभावसो॥**

पूर्णपात्रस्थापन—**ॐ पूर्ण्णादर्विपरापतसुपूर्ण्णापुनरापत॥ वस्नेवविक्रीणावहाऽइष-मूर्ज्जꣳशतक्रतो॥**

नारिकेलफलस्थापन—**ॐ याःफलिनीर्य्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः॥ बृहस्प्पतिप्प्रसूतास्तानोमुञ्चन्त्वꣳहसः॥**

वरुणध्यानावाहनपञ्चोपचारपूजन—**ॐ तत्त्वायामिब्ब्रह्मणावन्दमानस्तदाशास्ते यजमानोहविर्भिः॥ अहेडमानोवरुणेहबोध्युरुशꣳसमानऽआयुः प्प्रमोषीः॥**

अस्मिन् कलशे वरुणं साङ्गं सपरिवारं सवाहनं सायुधं सशक्तिकं आवाहयामि स्थापयामि। ॐ अपांपते वरुणाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

गङ्गाद्यावाहनम्—दक्षिण हाथ के स्पर्श से आवाहन करे—

कला कला हि देवानां दानवानां कला कलाः।
संगृह्य निर्मितो यस्मात्कलशस्तेन कथ्यते॥१॥
कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रिताः।
मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥२॥
कुक्षौ तु सागराः सप्त सप्तद्वीपा च मेदिनी।
अर्जुनीगोमती चैव चन्द्रभागा सरस्वती॥३॥
कावेरी कृष्णवेणा च गङ्गा चैव महानदी।
तापीगोदावरी चैव माहेन्द्री नर्मदा तथा॥४॥
नदाश्च विविधा जाता नद्यः सर्वास्तथापराः।
पृथिव्यां यानि तीर्थानि कलशस्थानि तानि वै॥५॥
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः।
आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः॥६॥

ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः।
अङ्गैश्च सहिताः सर्वे कलशाम्बुं समाश्रिताः॥७॥
अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा।
आयन्तु मम शान्त्यर्थं दुरितक्षयकारकाः॥८॥

ॐ ह्रीँ वँ गङ्गादिभ्यः आवाहिताः सुप्रतिष्ठिताः वरदाः भवन्तु।

प्रतिष्ठा—दोनों हाथ से स्पर्श करके प्रतिष्ठा करे—

ॐ मनोजूतिर्जुषतामाज्ज्यस्यबृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टंयज्ञ९समिमन्दधातु॥ विश्श्वेदेवासऽइहमादयन्तामोऽम्प्रतिष्ठ॥

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च।
अस्यै देवत्वमर्चायै मामहेति च कश्चन॥

कलश-प्रार्थना—दोनों हाथों में पुष्प लेकर प्रार्थना करे—

ॐ देवदानवसंवादे मथ्यमाने महोदधौ।
उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम्॥१॥
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः॥२॥
शिवः स्वयं त्वमेवाऽसि विष्णुस्त्वं प्रजापतिः।
आदित्या वसवो रुद्रा विश्वेदेवाः स पैतृकाः॥३॥
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव॥४॥
सर्वकामसमृद्ध्यर्थं अक्षयवरदायकम्।
सान्निध्यं कुरु मे देव! प्रसन्नो भव सर्वदा॥५॥
नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय।
सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते॥६॥
पाशपाणे! नमस्तुभ्यं पद्मिनीजीवनायक!।
यावत्कर्मसमाप्तिस्यात्तावत्त्वं सन्निधो भव॥७॥
नमः आद्याय बीजाय ज्ञानविज्ञानमूर्तये।
प्राणेन्द्रियमनोबुद्धिर्विकारैर्व्यक्तिमीयुषे ॥८॥

प्रधानकलशस्थापनं परिपूर्णम्

❁

पीठदेवतास्थापनंपूजनञ्च

सङ्कल्पः—ॐ तत्सदद्य पूर्वोच्चारितग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकनामाऽहं अस्मिन् स्वर्णाकर्षणभैरवप्रयोगकर्मणि स्वर्णाकर्षणभैरवप्रीतये पीठ-देवतानां स्थापनं पूजनं करिष्ये।

ॐ ह्रीँ वँ मण्डूकाय नमः मण्डूकशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ कालाग्निरुद्राय नमः कालाग्निरुद्रशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ कच्छपाय नमः कच्छपशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ आधारशक्तये नमः आधारशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ प्रकृतये नमः प्रकृतिशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ कूर्माय नमः कूर्मशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ अनन्ताय नमः अनन्तशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ पृथिव्यै नमः पृथ्वीशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ क्षीरसमुद्राय नमः क्षीरसमुद्रशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ रत्नद्वीपाय नमः रत्नद्वीपशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ कल्पवृक्षाय नमः कल्पवृक्षशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ मणिमण्डपाय नमः मणिमण्डपशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ स्वर्णसिंहासनाय नमः स्वर्णसिंहासनशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ धर्माय नमः धर्मशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ ज्ञानाय नमः ज्ञानशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ वैराग्नाय नमः वैराग्नशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ ऐश्वर्याय नमः ऐश्वर्यशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ अधर्माय नमः अधर्मशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ अज्ञानाय नमः अज्ञानशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ अवैराग्नाय नमः अवैराग्नशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ अनैश्वर्याय नमः अनैश्वर्यशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ कल्पान्तकारायानन्ताय नमः कल्पान्तकारायअनन्तशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ पद्माय नमः पद्मशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ आनन्दकन्दाय नमः आनन्दकन्दशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ संविन्नालाय नमः संविन्नालशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ विकारमयकेशरेभ्यो नमः विकारमयकेशरशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ प्रकृत्यात्मकपत्रेभ्यो नमः प्रकृत्यात्मकपत्रशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

ॐ ह्रीँ वँ पञ्चाशद्वर्णकर्णिकायै नमः पञ्चाशद्वर्णकर्णिकाशक्तिश्रीपादुकां आवाहयामि स्थापयामि पूजयामि। अक्षत प्रक्षेप पूर्वक आवाहन स्थापन करे।

पीठशक्तिनां पूजनम्

ॐ ह्रीँ आँ ह्रीँ क्रौँ आधार शक्तिभ्यो नमः आधारशक्तिश्रीपादुकां पूजयामि।

ॐ ह्रीँ आँ ह्रीँ क्रौँ जयाशक्तिभ्यो नमः जयाशक्तिश्रीपादुकां पूजयामि।

ॐ ह्रीँ आँ ह्रीँ क्रौँ विजयाशक्तिभ्यो नमः विजयाशक्तिश्रीपादुकां पूजयामि।

ॐ ह्रीँ आँ ह्रीँ क्रौँ अजिताशक्तिभ्यो नमः अजिताशक्तिश्रीपादुकां पूजयामि।

ॐ ह्रीँ आँ ह्रीँ क्रौँ अपराजिताशक्तिभ्यो नमः अपराजिताशक्तिश्रीपादुकां पूजयामि।

ॐ ह्रीँ आँ ह्रीँ क्रौँ नित्याशक्तिभ्यो नमः नित्याशक्तिश्रीपादुकां पूजयामि।

ॐ ह्रीँ आँ ह्रीँ क्रौँ विलासिनीशक्तिभ्यो नमः विलासिनीशक्तिश्रीपादुकां पूजयामि।

ॐ ह्रीँ आँ ह्रीँ क्रौँ दोग्ध्राशक्तिभ्योनमः दोग्ध्राशक्तिश्रीपादुकां पूजयामि।

ॐ ह्रीँ आँ ह्रीँ क्रौँ अघोराशक्तिभ्यो नमः अघोराशक्तिश्रीपादुकां पूजयामि।

ॐ ह्रीँ आँ ह्रीँ क्रौँ मङ्गलाशक्तिभ्यो नमः मङ्गलाशक्तिश्रीपादुकां पूजयामि।

ॐ ह्रीँ आँ ह्रीँ क्रौँ वटुकभैरवयोगपीठात्मने नमः वटुकभैरवश्रीपादुकां पूजयामि।

ॐ रक्ताब्धिपोतारुणपद्मसंस्थां पाशाङ्कुशेष्वासशराऽसिबाणान्।
शूलं कपालं दधतीं कराब्जैः रक्तां त्रिनेत्रां प्रणमामि देवीम्॥१॥

रक्त के समुद्र में पोत के सदृश अरुण वर्ण के पद्म पर आसीन हाथ में पाश-अंकुश-धनुष-खड्ग-बाण-शूल-कपाल से शोभायमान, रक्तवर्ण तथा तीन नेत्रोंवाली प्राणदेवी को प्रणाम॥१॥

पाशाश्चापासृक्क्कपाले ऋणीषूच्छूलं हस्तैर्विभ्रतीं रक्तवर्णाम्।
रक्तोदिन्वत्पोतरक्ताम्बुजस्थां देवीं ध्यायेत्प्राणशक्तिं त्रिनेत्राम्॥२॥

हाथों में पाशचापसृक्कपालशूल धारण किये हुए रक्त वर्णवाली रक्तवर्ण के कमल के आसन पर बैठी हुई प्राणशक्ति का ध्यान करता हूँ॥२॥

मानसोपचार पूजन करे।

ॐ ह्रीँ वँ सर्वशक्तिकमलासनाय नमः कमलासनशक्तिश्रीपादुकां पूजयामि।

पीठदेवतापूजनं परिपूर्णम्

❁

अग्न्युत्तारणम्

सङ्कल्पः—ॐ तत्सदद्य पूर्वोच्चारितग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकनामाऽहं अस्मिन् स्वर्णाकर्षणभैरवप्रयोगकर्मणि स्वर्णाकर्षणभैरवसुवर्णमूर्तेः अवघातादि दोषपरिहारार्थं अग्न्युत्तारणं करिष्ये।

गणेश की सुवर्णमयी प्रतिमा बना करके उसे अग्नि में तपा कर घृत लेपन करके उस पर अधोलिखित मन्त्रपाठ पूर्वक जल धारा गिराये।

ॐ समुद्रस्यत्त्वावकयाग्नेपरिव्ययामसि॥ पावकोऽअस्मभ्यंशिवोभव॥ ॐ हिमस्यत्वाजरायुणाग्नेपरिव्ययामसि॥ पावकोअस्मभ्यंशिवोभव॥ ॐ उपज्मनुप वेतसेऽवतरनदीष्वा॥ अग्नेपित्तमपामसिमण्डूकिताभिरागहि सेमंनोयज्ञंपावकवर्णंशिवंकृधि॥ ॐ अपामिदंन्ययनंसमुद्रस्यनिवेशनम्॥ अन्यांस्तेऽअस्मत्तपन्तुहेतयः पावकोऽअस्मभ्यंशिवोभव॥ ॐ अग्नेपावकरोचिषामन्द्रयादेवजिह्वया॥ आदेवा न्वक्षियक्षिच॥ ॐ सनःपावकदीदिवोऽग्नेदेवाँ२॥ऽइहावह॥ उपयज्ञंहविश्चनः॥ ॐ पावकयायश्चितयन्त्याकृपाक्षामन्रुरुचऽउषसोनभानुना॥ तूर्वन्नयामन्नेतशस्यनूरणऽ आयोघणेनततृषाणोऽअजरः॥ ॐ नमस्तेहरसेशोचिषेनमस्तेऽअस्त्वर्चिषे॥ अन्यांस्तेऽ अस्मत्तपन्तुहेतयःपावकोऽअस्मभ्यंशिवोभव॥ ॐ नृषदेवेडप्सुषदेवेड्बर्हिषदेवेड्वन-सदेवेट्स्वर्विदेवेट्॥ ॐ येदेवादेवानांय्यज्ञियायज्ञियानाᳬंसंवत्सरीणमुपभागमासते॥ अहुतादोहविषोयज्ञेऽअस्मिन्त्स्वयंपिबन्तुमधुनोघृतस्य॥ ॐ येदेवादेवेष्वधिदेवत्व-मायन्येब्रह्मणःपुरऽएतारोऽअस्य॥ येभ्योनऋतेपवतेधामकिञ्चननतेदिवोनऽपृथिव्याऽ-अधिस्नुषु॥ ॐ प्राणदाऽअपानदाव्यानदावर्चोदावरिवोदाः॥ अन्यांस्तेऽअस्मत्तपन्तु-हेतयपावकोऽअस्मभ्यंशिवोभव॥

अग्न्युत्तरण के पश्चात् बीज मन्त्र से प्राणप्रतिष्ठा करे।

ॐ आं ह्रीं क्रो यं रं लं वं शं षं सं सोऽहं हंसः अस्यस्वर्णाकर्षणभैरवस्यसुवर्णप्रतिमायां प्राणाः इह प्राणाः।

ॐ आं ह्रीं क्रो यं रं लं वं शं षं सं सोऽहं हंसः अस्यस्वर्णाकर्षणभैरवस्यसुवर्ण-प्रतिमायां जीव इह स्थितः।

ॐ आं ह्रीं क्रो यं रं लं वं शं षं सं सोऽहं हंसः अस्यस्वर्णाकर्षणभैरवस्यसुवर्णप्रतिमायां सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा।

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य्बृहस्प्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्ट्टंय्यज्ञᳬसमिमन्दधातु॥
व्विश्श्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठ॥

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च।
अस्यै देवत्वमर्चायै मामहेति च कश्चन॥

ॐ ह्रीँ वँ श्रीमद्बटुकभैरवाय नमः आवाहयामि स्थापयामि।

ॐ ह्रीँ वँ श्रीमद्बटुकभैरवाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

अग्न्युत्तारणं परिपूर्णम्

इष्टपूजनम्

सङ्कल्पः—ॐ तत्सदद्य पूर्वोच्चारितग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकनामाऽहं अस्मिन् स्वर्णाकर्षणभैरवप्रयोगकर्मणि स्वर्णाकर्षणभैरवपूजनं करिष्ये।

विनियोगः—ॐ अस्य श्री स्वर्णाकर्षणभैरवमहामन्त्रस्य ब्रह्मात्रृषिः, त्रिष्टुप् छन्दः, ब्रह्मविष्णुरुद्रत्रिमुर्तिरूपी भगवानस्वर्णाकर्षणभैरवोदेवता, ह्रींबीजं, सः शक्तिः, वँकीलकं ममसर्वविधसमस्तदारिद्र्य सद्यःविनाशपूर्वकसमस्तसमृद्धि प्राप्तये न्यासे पूजने जपे विनियोगः।

ऋष्यादिन्यासः—लेलिहान मुद्रा से न्यास करे—

ॐ भैरव ऋषये नमः शिरसि न्यस्यामि।

ॐ त्रिष्टुब्छन्दसे नमः मुखे न्यस्यामि।

ॐ त्रिमूर्तिरूपीभगवान श्रीस्वर्णाकर्षणभैरवदेवताभ्यो नमः हृदये न्यस्यामि।

ॐ ह्रीं बीजाय नमः गुह्ये न्यस्यामि।

ॐ सः शक्तये नमः पादयोः न्यस्यामि।

ॐ वँ कीलकाय नमः नभौ न्यस्यामि।

ॐ श्रीस्वर्णाकर्षणभैरवाय नमः सर्वाङ्गे न्यस्यामि।

करन्यासः—लेलिहान मुद्रा से न्यास करे—

ॐ ऐं ह्रीं क्लीं क्लूं ह्रां ह्रीं ह्रूं सः वं आपदुद्धारणाय नमः अङ्गुष्ठाभ्यां नमः।

ॐ अजामलबद्धाय नमः तर्जनीभ्यां नमः।

ॐ लोकेश्वराय नमः मध्यमाभ्यां नमः।

ॐ स्वर्णाकर्षणभैरवाय नमः अनामिकाभ्यां नमः।

ॐ ममदारिद्र्यविद्वेषणाय नमः कनिष्ठिकाभ्यां नमः।

ॐ श्रीमहाभैरवाय नमः करतलकरपृष्ठाभ्यां नमः।

हृदयादिन्यासः—लेलिहान मुद्रा से न्यास करे—

ॐ ऐं ह्रीं क्लीं क्लूं ह्रां ह्रीं ह्रूं सः वं आपदुद्धारणाय नमः हृदयाय नमः।

ॐ अजामलबद्धाय नमः शिरसे स्वाहा।

ॐ लोकेश्वराय नमः शिखायै वषट्।

ॐ स्वर्णाकर्षणभैरवाय नमः कवचाय हुम्।

ॐ ममदारिद्र्यविद्वेषणाय नमः नेत्रत्रयाय वौषट्।

ॐ श्रीमहाभैरवाय नमः अस्त्राय फट्।

ध्यानम्—दोनों हाथ से पुष्प लेकर ध्यान करे—

ॐ नमस्तेरुद्रमुन्यवऽउतोतऽअषवे नमः॥ बाहुब्भ्यामुतते नमः॥

ॐ पीतवर्णं चतुर्बाहुं त्रिनेत्रं पीतवाससम्।
अक्षयं स्वर्णमाणिक्य तडित्पूरित पात्रकम्॥१॥
अभिलसन्महाशूलं चामरं तोमरोद्वहन।
सततं चिन्तयेद्देवं भैरवं सर्वसिद्धिदम्॥२॥
मन्दारद्रुम कल्पमूलमहिते माणिक्यसिंहासने।
संविष्टोदरभिन्नचम्पकरुचादेव्या समालिङ्गिता॥३॥
भक्तेभ्यः कररत्नपात्रभरितं स्वर्णंदधानोभृषम्।
स्वर्णाकर्षणभैरवो विजयते स्वर्णाकृतिः सर्वदा॥४॥

ॐ ऐं ह्रीं क्लीं क्लूँ ह्राँ ह्रीँ ह्रूँ सः वं आपदुद्धारणाय अजामलबद्धाय लोकेश्वराय स्वर्णाकर्षणभैरवाय ममदारिद्र्यविद्वेषणाय ॐ ह्रीँ महाभैरवाय नमः ध्यायामि ध्यानोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। ध्यान करके पुष्प चढ़ाये।

आवाहनम्—दोनों हाथ से पुष्प लेकर आवाहन करे—(प्रतिष्ठित मूर्ति या यन्त्र पर आवाहन नहीं होता है।)

ॐ विष्णोर्रराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसि॥ वैष्णवमसिविष्णवेत्त्वा॥ ॐ भूर्भुवः स्वः भो विष्णो! इहागच्छ, इहतिष्ठ विष्णवे नमः विष्णुमावाहयामि स्थापयामि।

इन्द्रावाहनम्—इन्द्रपिण्ड सुपाड़ी पर अक्षत छोड़े—

ॐ इन्द्रऽआसांनेताबृहस्पतिर्द्दक्षिणायज्ञःपुरऽएतुसोमः॥ देवसेनानामभिभञ्जतीनांजयन्तीनांमरुतोयन्त्वग्ग्रम्॥ ॐ भूर्भुवः स्वः भो इन्द्राय! इहागच्छ, इह तिष्ठ इन्द्राय नमः इन्द्रमावाहयामि स्थापयामि।

इन्द्राण्यावाहनम्—इन्द्राणिपिण्ड सुपाड़ी पर अक्षत छोड़े—

ॐ अदित्यैरास्नासीन्द्राण्याऽउष्णीषः॥ पूषासिघर्म्मायदीष्व॥ ॐ भूर्भुवः स्वः भो इन्द्राणि! इहागच्छ, इह तिष्ठ इन्द्राण्यै नमः इन्द्राणीमावाहयामि स्थापयामि।

प्रजापत्यावाहनम्—प्रजापतिपिण्ड सुपाड़ी पर अक्षत छोड़े—

ॐ प्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिताबभूव॥ यत्कामास्तेजुहुमस्तन्नोऽअस्तुवयंस्यामपतयोरयीणाम्॥ ॐ भूर्भुवः स्वः भो प्रजापते! इहागच्छ, इह तिष्ठ प्रजापतये नमः प्रजापतिमावाहयामि स्थापयामि।

सर्पानावाहनम्—सर्पपिण्ड सुपाड़ी पर अक्षत छोड़े—

ॐ नमोस्तुसर्प्पेभ्योयेकेचपृथिवीमनु॥ येऽअन्तरिक्षेयेदिवितेभ्यःसर्प्पेभ्यो नमः॥ ॐ भूर्भुवः स्वः भो सर्पान्! इहागच्छ, इह तिष्ठ सर्पेभ्यो नमः सर्पानावाहयामि स्थापयामि।

ब्रह्मा-आवाहनम्—ब्रह्मापिण्ड सुपाड़ी पर अक्षत छोड़े—

ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचौवेनआवः ॥ सबुद्धन्याऽउपमाऽ-अस्यविष्ठाः सतश्चयोनिमसतश्चविवः ॥ ॐ भूर्भुवः स्वः भो ब्रह्मन्! इहागच्छ इह तिष्ठ ब्रह्मणे नमः ब्रह्माणमावाहयामि स्थापयामि।

पञ्चलोकपालादिस्थापनम्

गणेशावाहनम्—गणेशपिण्ड सुपाड़ी पर अक्षत छोड़े—

ॐ गणानान्त्वागणपतिँ हवामहेप्प्रियाणान्त्वाप्प्रियपतिँ हवामहेनिधीनान्त्वा निधिपतिँ हवामहेवसोमम ॥ आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम् ॥ ॐ भूर्भुवः स्वः भो गणपतये! इहागच्छ इह तिष्ठ गणपतये नमः गणपतिमावाहयामि स्थापयामि।

दुर्गा-आवाहनम्—दुर्गापिण्ड सुपाड़ी पर अक्षत छोड़े—

ॐ अम्बेऽअम्बिकेऽम्बालिकेनमानयतिकश्चन ॥ ससस्त्यश्वकः सुभद्रिकाङ्का म्पीलवासिनीम् ॥ ॐ भूर्भुवः स्वः भो दुर्गे! इहागच्छ इह तिष्ठ दुर्गायै नमः दुर्गामावा-हयामि स्थापयामि।

वाय्वाहनम्—वायुपिण्ड सुपाड़ी पर अक्षत छोड़े—

ॐ वायोयेतेसहस्रिणोरथासस्तेभिरागहि ॥ नियुत्त्वान्त्सोमपीतये ॥ ॐ भूर्भुवः स्वः भो! वायो इहागच्छ इह तिष्ठ वायवे नमः वायुमावाहयामि स्थापयामि।

आकाशावाहनम्—आकाशपिण्ड सुपाड़ी पर अक्षत छोड़े—

ॐ घृतंघृतपावानः पिबतवसांवसापावानः पिबन्तान्तरिक्षस्यहविरसिस्वाहा ॥ दिशःप्प्रदिशऽआदिशोविदिशऽउद्दिशोदिग्भ्यःस्वाहा ॥ ॐ भूर्भुवः स्वः भो आकाश! इहागच्छ इह तिष्ठ आकाशाय नमः आकाशमावाहयामि स्थापयामि।

अश्विनीकुमारावाहनम्—अश्विनीकुमार पिण्ड सुपाड़ी पर अक्षत छोड़े—

ॐ यावांकशामधुमत्याश्विनासूनृतावती ॥ तयायज्ञंमिमिक्षतम् ॥ ॐ भूर्भुवः स्वः भो अश्विनौ! इहागच्छतम् इह तिष्ठतम् अश्विभ्यां नमः अश्विनौ आवाहयामि स्थापयामि।

वास्तोस्पत्यावाहनम्—वास्तोस्पतिपिण्ड सुपाड़ी पर अक्षत छोड़े—

ॐ वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोऽअनमीवोभवानः ॥ यत्त्वेमहेप्रतितन्नो जुषस्वशंनोभवद्विपदेशंचतुष्पदे ॥ ॐ भूर्भुवः स्वः भो वास्तोष्पते! इहागच्छ इह तिष्ठ वास्तोष्पतये नमः वास्तोष्पतिमावाहयामि स्थापयामि।

क्षेत्रपालावाहनम्—क्षेत्रपालपिण्ड सुपाड़ी पर अक्षत छोड़े—

ॐ नहिस्प्पशमविदन्नन्यमस्माद्वैश्वानरात्पुरऽएतारमग्नेः ॥ एमैनमवृधन्नमृताऽ

अमर्त्यं वैश्वानरं क्षैत्रजित्त्याय देवाः॥ ॐ भूर्भुवः स्वः भो क्षेत्राधिपते! इहागच्छ इह तिष्ठ क्षेत्राधिपतये नमः क्षेत्राधिपतिमावाहयामि स्थापयामि।

दशदिक्पालानां स्थापनम्

इन्द्रावाहनम्—पूर्व में इन्द्रपिण्ड सुपाड़ी पर अक्षत छोड़े—

ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम्॥ ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः॥ ॐ भूर्भुवः स्वः भो इन्द्र! इहागच्छ इह तिष्ठ इन्द्राय नमः इन्द्रमावाहयामि स्थापयामि।

अग्न्यावाहनम्—अग्निकोण में अग्निपिण्ड सुपाड़ी पर अक्षत छोड़े—

ॐ त्वन्नोऽअग्ने तव पायुभिर्म्मघोनो रक्ष तन्वश्च वन्द्य॥ त्राता तोकस्य तनये गवामस्यनिमेषꣳ रक्षमाणस्तव व्रते॥ ॐ भूर्भुवः स्वः भो अग्ने! इहागच्छ इह तिष्ठ अग्नये नमः अग्निमावाहयामि स्थापयामि।

यमावाहनम्—दक्षिणदिशा में यमपिण्ड सुपाड़ी पर अक्षत छोड़े—

ॐ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा॥ स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे॥ ॐ भूर्भुवः स्वः भो यम! इहागच्छ इह तिष्ठ यमाय नमः यममावाहयामि स्थापयामि।

निर्ऋत्यावाहनम्—नैर्ऋत्यकोण में निर्ऋतिपिण्ड सुपाड़ी पर अक्षत छोड़े—

ॐ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य॥ अन्यमस्मदिच्छ सा तऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु॥ ॐ भूर्भुवः स्वः भो निर्ऋतिः! इहागच्छ इह तिष्ठ निर्ऋतये नमः निर्ऋतिमावाहयामि स्थापयामि।

वरुणावाहनम्—पश्चिमदिशा में वरुणपिण्ड सुपाड़ी पर अक्षत छोड़े—

ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः॥ अहेडमानो वरुणेह बोध्युरुशꣳस मा न ऽआयुः प्प्रमोषीः॥ ॐ भूर्भुवः स्वः भो वरुण! इहागच्छ इह तिष्ठ वरुणाय नमः वरुणमावाहयामि स्थापयामि।

वाय्वावाहनम्—वायुकोण में वायुपिण्ड सुपाड़ी पर अक्षत छोड़े-

ॐ आ नो नियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुप याहि यज्ञम्॥ वायोऽअस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः॥ ॐ भूर्भुवः स्वः भो वायो! इहागच्छ इह तिष्ठ वायवे नमः वायुमावाहयामि स्थापयामि।

सोम-आवाहनम्—उत्तरदिशा में सोमपिण्ड सुपाड़ी पर अक्षत छोड़े—

ॐ वयꣳ सोम व्रते तव मनस्तनूषु बिभ्रतः॥ प्रजावन्तः सचेमहि॥ ॐ भूर्भुवः स्वः भो सोम! इहागच्छ इह तिष्ठ सोमाय नमः सोममावाहयामि स्थापयामि।

ईशानावाहनम्—ईशानकोण में ईशानपिण्ड सुपाड़ी पर अक्षत छोड़े—

ॐ तमीशानंजगतस्तस्थुषस्पतिंधियञ्जिन्वमवसेहूमहेवयम्॥ पूषानोयथावेदसाम संधेरक्षितापायुरदब्धःस्वस्तये॥ ॐ भूर्भुवः स्वः भो! ईशान इहागच्छ, इह तिष्ठ ईशानाय नमः ईशानमावाहयामि स्थापयामि।

ब्रह्मावाहनम्—ईशानपूर्व के मध्य ब्रह्मापिण्ड सुपाड़ी पर अक्षत छोड़े—

ॐ अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाः॥ यःशंसतेस्तुवतेधायि पज्ज्रइन्द्रज्ज्येष्ठाऽअस्म्माँ२॥ऽअवन्तुदेवाः॥ ॐ भूर्भुवः स्वः भो ब्रह्मा! इहागच्छ इह तिष्ठ ब्रह्मणे नमः ब्रह्माणमावाहयामि स्थापयामि।

अनन्तावाहनम्—नैर्ऋत्यपश्चिम के मध्य में अनन्तपिण्ड सुपाड़ी पर अक्षत छोड़े—

ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी॥ यच्छानःशर्म्मसप्रथाः॥ ॐ भूर्भुवः स्वः भो अनन्त! इहागच्छ, इह तिष्ठ अनन्ताय नमः अनन्तमावाहयामि स्थापयामि।

प्रतिष्ठा—दोनों हाथ से स्पर्श करके प्रतिष्ठा करे—

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टंय्यज्ञःसमिमन्दधातु॥ विश्श्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठ॥

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च।
अस्यै देवत्वमर्चायै मामहेति च कश्चन॥

सूर्याद्यनन्तान्तदेवताः आवाहिताः सुप्रतिष्ठिता स्थापिताः वरदाः भवन्तु॥

ग्रहमण्डलस्थदेवतास्थापनं परिपूर्णम्

ग्रहमण्डलस्थदेवातानां पूजनम्

सङ्कल्पः—ॐ तत्सदद्य पूर्वोच्चारितग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकनामाऽहं अस्मिन् स्वर्णाकर्षणभैरवप्रयोगकर्मणि ग्रहाणामधिदेवताप्रत्यधिदेवतापञ्चलोकपालदिग्पालानां पूजनं करिष्ये।

ध्यानम्—दोनों हाथ से पुष्प लेकर ध्यान करे—

ॐ सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात्॥ सभूमिꣳ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः ध्यानार्थे पुष्पाणि समर्पयामि।

आसनम्—दोनों हाथ से अक्षत लेकर आसन का ध्यानकर समर्पित करे—

ॐ पुरुषऽएवेदꣳ सर्वंय्यद्भूतंयच्चभाव्यम्॥ उतामृतत्त्वस्येशानोयदन्नेनातिरोहति॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः आसनार्थे अक्षतान् समर्पयामि।

पाद्यम्—दोनों हाथ से पाद्यपात्र लेकर समर्पित करे—

ॐ एतावानस्यमहिमातोज्ज्यायाँश्चपूरुषः॥ पादोऽस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः पादयोः पाद्यं समर्पयामि।

अर्घ्यम्—दोनों हाथ से अर्घ्यपात्र लेकर समर्पित करे—

ॐ त्रिपादूर्द्ध्वउदैत्पुरुषः पादोऽस्येहाभवत्पुनः॥ ततोविष्वङ्व्यक्क्रामत्साशनानशनेऽअभि॥ ॐ भूर्भुवः स्वः आदित्यादिग्रहमण्डलस्थदेवताभ्यो नमः अर्घ्यं समर्पयामि।

आचमनम्—दोनों हाथ से आचमनीयपात्र लेकर समर्पित करे—

ॐ ततोविराडजायतविराजोऽअधिपूरुषः॥ सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः आचमनार्थे गङ्गोदकं समर्पयामि।

स्नानीयम्—दोनों हाथ से स्नानीयपात्र लेकर समर्पित करे—

ॐ तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्ज्यम्॥ पशूँस्ताँश्चक्क्रेवायव्यानारण्याग्राम्म्याश्चये॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः स्नानीयं जलं समर्पयामि।

पुनराचमनीयम्—दोनों हाथ से आचमनीय जल लेकर समर्पित करे—

ॐ तस्माद्यज्ञात्सर्व्वहुतऽऋचः सामानिजज्ञिरे॥ छन्दाँ ᳪसिजज्ञिरेतस्माद्यजुस्तस्माँदजायत॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः पुनराचमनार्थे गङ्गोदकं समर्पयामि।

पयःस्नानम्—दोनों हाथ से पयःपात्र लेकर समर्पित करे—

ॐ पयः पृथिव्यांपयऽओषधीषुपयोदिव्युन्तरिक्षेपयोधाः॥ पयस्वतीः प्प्रदिशः सन्तुमह्यम्॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः पयःस्नानं समर्पयामि। पयःस्नानान्ते शुद्धोदकस्नानं समर्पयामि तदन्ते आचमनीयं जलं समर्पयामि।

दधिस्नानम्—दोनों हाथ से दधिपात्र लेकर समर्पित करे—

ॐ दधिक्राव्णोऽअकारिषंजिष्णोरश्वस्यवाजिनः॥ सुरभिनोमुखाकरत्प्रणऽआयूᳪषितारिषत्॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः दधिस्नानं समर्पयामि। दधिस्नानान्ते शुद्धोदकस्नानं समर्पयामि तदन्ते आचमनीयं जलं समर्पयामि।

घृतस्नानम्—दोनों हाथ से घृतपात्र लेकर समर्पित करे—

ॐ घृतम्मिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतम्वस्यधाम॥ अनुष्ष्वधमावहमादयस्वस्वाहाकृतंवृषभवक्षिहव्यम्॥ ॐ भूर्भुवः स्वः आदित्यादिग्रहमण्डलस्थदेवताभ्यो नमः घृतस्नानं समर्पयामि। घृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि तदन्ते आचमनीयं जलं समर्पयामि।

मधुस्नानम्—दोनों हाथ से मधुपात्र लेकर समर्पित करे—

ॐ मधुवाताऽऋतायतेमधुक्षरन्तिसिन्धवः॥ माद्ध्वीर्न्नः सन्त्वोषधीः॥ मधुनक्तमुतोषसोमधुमत्पार्थिवᳬरजः॥ मधुद्यौरस्तुनः पिता॥ मधुमान्नोवनस्प्पतिर्म्मधुमाँऽअस्तुसूर्य्यः॥ माद्ध्वीर्ग्गावो भवन्तु नः॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः मधुस्नानं समर्पयामि। मधुस्नानान्ते शुद्धोदकस्नानं समर्पयामि तदन्ते आचमनीयं जलं समर्पयामि।

शर्करास्नानम्—दोनों हाथ से शर्करापात्र लेकर समर्पित करे—

ॐ अपाᳪरसमुद्द्वयसᳪसूर्य्येसन्तᳪसमाहितम्॥ अपाᳪरसस्ययोरसस्तंवोगृह्णाम्युत्तममुपयामगृहीतोऽसीन्द्रायत्त्वाजुष्टंगृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टतमम्॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः शर्करास्नानं समर्पयामि। शर्करास्नानान्ते शुद्धोदकस्नानं समर्पयामि तदन्ते आचमनीयं जलं समर्पयामि।

पञ्चामृतस्नानम्—दोनों हाथ से पञ्चामृतपात्र लेकर समर्पित करे—

ॐ पञ्चनद्यः सरस्वतीमपियन्ति सस्रोतसः॥ सरस्वती तु पञ्चधा सो देशेभवत्सरित्॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः मिलितपञ्चामृतस्नानं समर्पयामि।

शुद्धोदकस्नानम्—दोनों हाथ से जलपात्र लेकर समर्पित करे—

ॐ शुद्धवालः सर्वशुद्धवालो मणिवालस्तऽआश्विनाः श्येतः श्येताक्षोरुणस्ते रुद्राय पशुपतये कर्ण्णा यामाऽअवलिप्ता रौद्रा नभोरूपाः पार्ज्जन्न्याः॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः शुद्धोदकस्नानं समर्पयामि।

वस्त्रनिवेदनम्—दोनों हाथ से वस्त्र लेकर समर्पित करे—

ॐ तस्मादश्श्वाऽअजायन्त ये के चोभयादतः॥ गावो ह जज्ञिरे तस्म्मात्तस्म्माज्जाताऽअजावयः॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः वस्त्रं समर्पयामि।

वस्त्राङ्गाचमनीयजलम्—दोनों हाथ से आचमनीय जल लेकर समर्पित करे—

ॐ आपो हि ष्ठा मयो भुवस्ता नऽऊर्जे दधातन॥ महे रणाय चक्षसे॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः वस्त्रान्ते आचमनीयं समर्पयामि।

उपवस्त्रनिवेदनम्—दोनों हाथ से उपवस्त्र लेकर समर्पित करे—

ॐ तं यज्ञम्बर्हिषि प्प्रौक्षन्पुरुषञ्जातमग्ग्रतः॥ तेन देवाऽअयजन्त साध्याऽऋषयश्श्च ये॥ ॐ सुजातो ज्योतिषा सह शर्म्म वरूथमासदत्स्वः॥ वासोअग्ग्रे विश्श्वरूपꣳ संव्ययस्व विभावसो॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः उपवस्त्रं समर्पयामि।

वस्त्राङ्गाचमनीयजलम्—दोनों हाथ से आचमनीय जल लेकर समर्पित करे—

ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः॥ उशतीरिव मातरः॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः उपवस्त्रान्ते आचमनीयं समर्पयामि।

यज्ञोपवीतनिवेदनम्—दोनों हाथ से यज्ञोपवीत लेकर समर्पित करे—

ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्॥ मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्च्येते॥ ॐ यज्ञो देवानाम्प्प्रत्त्येति सुम्म्नमादित्त्यासो भवता मृडयन्तः॥ आवोर्वाची सुमतिर्व्ववृत्त्यादꣳहोश्च्चिद्या वरिवो वित्तरासदादित्त्येभ्यस्त्वा॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः यज्ञोपवीतं समर्पयामि।

यज्ञोपवीताङ्गाचमनीयम्—दोनों हाथ से आचमनीय लेकर समर्पित करे—

ॐ तस्माऽअरंङ्गमामवोयस्यक्षयायजिन्वथ॥ आपोजनयथा च नः॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः यज्ञोपवीतान्ते आचमनीयं समर्पयामि।

सुगन्धिद्रव्यसमर्पणम्—दोनों हाथ से सुगन्धिद्रव्य लेकर समर्पित करे—

ॐ त्वाङ्गन्धर्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः॥ त्वामौषधेसोमोराजाविद्वान्यक्ष्मादमुच्यत॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः गन्धानुलेपनं समर्पयामि।

अक्षतसमर्पणम्—दोनों हाथ से अक्षत लेकर समर्पित करे—

ॐ अक्षन्नमीमदन्तह्यवप्प्रियाऽअधूषत॥ अस्तौषतस्वभानवोविप्प्रानविष्ठयामतीयोजान्विन्द्रतेहरी॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः अलङ्करणार्थे अक्षतान् समर्पयामि।

पुष्पमालासमर्पणम्—दोनों हाथ से पुष्पमाला लेकर समर्पित करे—

ॐ ओषधीःप्प्रतिमोदद्ध्वंपुष्प्पवतीःप्रसूवरीः॥ अश्वाऽइवसजित्त्वरीर्वीरुधःपारयिष्णवः॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः पुष्पमालां परिधापयामि।

दूर्वासमर्पणम्—दोनों हाथ से दूर्वा लेकर समर्पित करे—

ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषष्प्परि॥ एवानोदूर्वेप्प्रतनुसहस्रेण शतेन च॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थ देवताभ्यो नमः दूर्वाङ्कुरान् समर्पयामि।

नानापरिमलद्रव्यसमर्पणम्—दोनों हाथ सें अबीरबुक्का लेकर समर्पित करे—

ॐ अहिरिवभोगैःपर्य्येतिबाहुंज्यायाहेतिंप्परिबाधमानः॥ हस्तग्घ्नोविश्वावयुनानिविद्वान्पुमान्पुमांꣳसंपरिपातुविश्वतः॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्त-ग्रहमण्डलस्थदेवताभ्यो नमः नानापरिमलद्रव्याणि समर्पयामि।

सिन्दूरसमर्पणम्—दोनों हाथ से सिन्दूर लेकर समर्पित करे—

ॐ सिन्धोरिवप्राद्ध्वनेशूघनासोवातप्प्रमियःपतयन्तियह्वाः॥ घृतस्यधाराऽअरुषोनवाजीकाष्ठाभिन्दन्नूर्म्मिभिःपिन्वमानः॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्त-ग्रहमण्डलस्थदेवताभ्यो नमः सिन्दूराभरणं समर्पयामि। ततः नैवेद्यं पुरतः संस्थाप्य धूपदीपौ प्रज्वाल्य।

धूपसमर्पणम्—दोनों हाथ से धूपपात्र लेकर समर्पित करे—

ॐ ब्राह्मणोऽस्यमुखमासीद्बाहूराजन्न्यःकृतः॥ ऊरूतदस्ययद्वैश्यःपद्भ्याꣳ

शूद्रोऽअजायत॥ ॐ धूरसिधूर्व्वधूर्वन्तंधूर्वतंयोऽस्मान्धूर्वतितंधूर्वयंवयंधूर्वामः॥ देवानामसि-वह्नितमꣳसस्नितमंपप्रितमंजुष्टतमंदेवहूतमम्॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्त-ग्रहमण्डलस्थदेवताभ्यो नमः धूपं समर्पयामि।

दीपसमर्पणम्—दोनों हाथ से दीपपात्र लेकर समर्पित करे—

ॐ चन्द्रमामनसोजातश्चक्षोःसूर्य्योऽअजायत॥ श्रोत्राद्वायुश्चप्राणश्चमुखा दग्निरजायत॥ ॐ अग्निर्ज्ज्योतिर्ज्ज्योतिरग्निःस्वाहासूर्य्योज्ज्योतिर्ज्ज्योतिःसूर्य्यः स्वाहा॥ अग्निर्वर्च्चोज्ज्योतिर्वर्च्चःस्वाहासूर्य्योवर्च्चोज्ज्योतिर्वर्च्चःस्वाहा॥ ज्ज्योतिः सूर्य्यःसूर्य्योज्ज्योतिःस्वाहा॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थ-देवताभ्यो नमः दीपज्योतिं समर्पयामि।

नैवेद्यसमर्पणम्—दोनों हाथ से नैवेद्यपात्र लेकर समर्पित करे—

ॐ नाभ्याऽआसीदन्तरिक्षꣳशीर्ष्णोद्यौःसमवर्त्तत॥ पद्भ्याम्भूमिर्द्दिशःश्रोत्रा त्तथालोकाँ२॥ऽअकल्पयन्॥ ॐ अन्नपतेऽन्नस्यनोदेह्यनमीवस्यशुष्मिणः॥ प्र प्रदातारंतारिषऊर्ज्जन्नोधेहिद्विपदेचतुष्पदे॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्त-ग्रहमण्डलस्थदेवताभ्यो नमः नैवेद्यं समर्पयामि। ॐ प्राणाय स्वाहा। ॐ अपानाय स्वाहा। ॐ समानाय स्वाहा। ॐ उदानाय स्वाहा। ॐ व्यानाय स्वाहा। मध्ये पानीयं जलं उत्तरापोशनं समर्पयामि।

करोद्वर्तनसमर्पणम्—दोनों हाथ से करोद्वर्तन लेकर समर्पित करे—

ॐ अꣳशुनातेअꣳशुःपृच्च्यतांपरुषापरुः॥ गन्धस्तेसोममवतुमदायरसोऽ-अच्च्युतः॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः करोद्वर्तनार्थे चन्दनानुलेपनं समर्पयामि।

ताम्बूलादिसमर्पणम्—दोनों हाथ से ताम्बूल लेकर समर्पित करे—

ॐ यत्पुरुषेणहविषादेवायज्ञमतन्वत॥ वसन्तोऽस्यासीदाज्ज्यंग्रीष्मऽइध्मः शरद्धविः॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः मुख-शुद्ध्यर्थे पूङ्गीफलमेलालवङ्गादिनागवल्लीसहितताम्बूलवीटिकां समर्पयामि।

फलादिसमर्पणम्—दोनों हाथ से फलपात्र लेकर समर्पित करे—

ॐ याः फलिनीर्य्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः॥ बृहस्पतिप्रसूता-स्तानोमुञ्चन्त्वꣳहसः॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः ऋतुकालोद्भवफलानि समर्पयामि। फलान्ते आचमनीयं समर्पयामि।

दक्षिणासमर्पणम्—दोनों हाथ से दक्षिणा लेकर समर्पित करे—

ॐ हिरण्यगर्भःसमवर्त्तताग्रेभूतस्यजातःपतिरेकऽआसीत्। सदाधारपृथिवी द्यामुतेमांकस्मैदेवायहविषाविधेम्॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रह-

मण्डलस्थदेवताभ्यो नमः कृतायाः पूजायाः साद्गुण्यार्थे द्रव्यदक्षिणां समर्पयामि।

नीराजनसमर्पणम्—दोनों हाथ से नीराजन लेकर घुमाये—

ॐ आरात्रिपार्थिवꣳरजः पितुरप्प्रायिधामभिः॥ दिवः सदाꣳसि बृहती वितिष्ठस आत्वेषं वर्त्तते तमः॥ ॐ इदꣳ हविः प्रजननं मेऽअस्तु दशवीरꣳ सर्वगणꣳ स्वस्तये॥ आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि॥ अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतोऽअस्मासु धत्त॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः कर्पूरनीराजनं समर्पयामि।

पुष्पाञ्जलिसमर्पणम्—दोनों हाथ से पुष्प लेकर समर्पित करे—

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन्॥ ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्त-ग्रहमण्डलस्थदेवताभ्यो नमः मन्त्रपुष्पाञ्जलिं समर्पयामि।

परिक्रमासमर्पणम्—दोनों हाथ से पुष्प लेकर समर्पित करे—

ॐ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः॥ देवा यद्यज्ञं तन्वाना ऽअबध्नन्पुरुषं पशुम्॥ ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः परिक्रमां समर्पयामि।

परिक्रमा के पश्चात् जल, गन्ध, अक्षत, फल, पुष्प, दूर्वा, कुशा, दधि, दुग्ध, सर्षपादि सभी द्रव्यों को अर्घ्यपात्र में लेकर विशेषार्घ्य प्रदान करे।

विशेषार्घ्यसमर्पणम्—दोनों हाथ से विशेषार्घ्य लेकर समर्पित करे—

रक्ष रक्ष ग्रहा सर्वे अधिप्रत्यधिदेवता।
दिग्पालाश्चयुतादेवाः लोकपालदेवास्तथा॥१॥
कुर्वन्तु सर्वकार्याणि मङ्गलानि पदे पदे।
आयुरारोग्यमैश्वर्यं ददध्वं सर्वदा मया॥२॥
मोदनार्थं प्रदाष्यामि समर्थं सग्रहाधिपाः।
विविधद्रव्यसंयुतं विशेषार्घ्यं समर्पितम्॥३॥

ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः विशेषार्घ्यं समर्पयामि।

प्रार्थना—दोनों हाथों में पुष्प लेकर प्रार्थना करे—

ग्रहाणामादिरादित्यो लोकरक्षणकारकः।
विषमस्थानसम्भूतां पीडां दहतु मे रविः॥१॥
रोहिणीशः सुधामूर्तिः सुधागात्रो सुधाशनः।
विषमस्थानसम्भूतां पीडां दहतु मे विधुः॥२॥

भूमिपुत्रो महातेजा जगतोभयकृत्सदा।
वृष्टिकृद् वृष्टिहर्ता च पीडां दहतु मे कुजः॥३॥
उत्पातरूपी जगतां चन्द्रपुत्रो महाद्युतिः।
सूर्यप्रियकरो विद्वान् पीडां दहतु मे बुधः॥४॥
देवमन्त्री विशालाक्षो सदालोकहितेरतः।
अनेकशिष्यसम्पूर्णः पीडां दहतु मे गुरुः॥५॥
दैत्यमन्त्री गुरुस्तेषां प्रणवश्च महाद्युतिः।
प्रभुस्ताराग्रहाणां च पीडां दहतु मे भृगुः॥६॥
सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः।
मन्दचारः प्रसन्नात्मा पीडां दहतु मे शनिः॥७॥
महाशीर्षी महावक्त्रो महादंष्ट्रो महायशाः।
अतनुश्चोर्ध्वकेशश्च पीडां दहतु मे तमः॥८॥
अनेकरूपवर्णैश्च शतशोऽथ सहस्त्रशः।
उत्पातरूपी घोरश्च पीडां दहतु मे शिखी॥९॥

ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः प्रार्थनां समर्पयामि।

पुष्पाञ्जलिसमर्पणम्—दोनों हाथ से पुष्प लेकर समर्पित करे—

ॐ ग्रहाऽऊर्ज्जाहुतयो॒व्यन्तो॒विप्प्रा॑यमतिम्॥ तेषांविशिप्प्रियाणांव्वो॒ऽहमिषमूर्ज्जꣳ समग्ग्रभमुपयामगृहीतो॒ऽसीन्द्रा॑यत्त्वा॒जुष्टं॑गृह्णाम्म्ये॒षतेयोनि॒रिन्द्रा॑यत्त्वा॒जुष्ट॑तमम्॥

ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च।
गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहा शान्तिकरा भवन्तु॥

ॐ भूर्भुवः स्वः आदित्याद्यनन्तान्तग्रहमण्डलस्थदेवताभ्यो नमः पुष्पाञ्जलिं समर्पयामि।

पूजनसमर्पणम्—दोनों हाथ से पुष्प लेकर समर्पित करे—

अनया पूजया आदित्याद्यनन्तान्तग्रहमण्डलस्थ देवताः प्रीयन्तां न मम्॥

ग्रहमण्डलस्थदेवानां पूजनं परिपूर्णम्

❀

असङ्ख्यातरुद्रपूजनम्

असङ्ख्यातरुद्रकलशस्थापनम्—विधिपूर्वक कलश स्थापन करे—

ग्रहमण्डलस्थ देवताओं के आवाहन-स्थापन-पूजन के पश्चात् सर्वप्रथम ग्रहवेदी के मध्य में अक्षत रखकर उस अक्षत के मध्य में रोली से अष्टदल निर्मित कर उसके ऊपर कलश स्थापित करके, असङ्ख्यातरुद्र के लिए नारियल स्थापित करे, कलशपूजन करने के बाद उस पर असंख्यातरुद्र के लिए प्रतिमा पर अग्न्युत्तारण विधि करके प्रतिष्ठाकर पूजन करे अथवा ईशान कोण की दिशा में भूमि पर अथवा अन्य वेदी पर असङ्ख्यातरुद्र के लिए कलश रखकर वरुणादि स्थापना के पश्चात् उसके ऊपर नारियल अथवा मूर्ति रखकर पूजन करे।

सङ्कल्पः—**ॐ तत्सदद्य पूर्वोच्चारितग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकनामाऽहं अस्मिन् स्वर्णाकर्षणभैरवप्रयोगकर्मणि असङ्ख्यातरुद्रप्रीतये कलश-स्थापनपूर्वकं असङ्ख्यातरुद्राणां आवाहनस्थापनपूजनं करिष्ये।**

भूमिस्पर्श—**ॐ महीद्यौः पृथिवीचनऽइमंय्यज्ञंमिमिक्षताम्।। पिपृतान्नोभरीमभिः।।**

सप्तधान्य विखेरना—**ॐ ओषधयः समवदन्तसोमेनसहराज्ञा।। यस्मैकृणोति ब्राह्मणस्तꣳराजन्न्पारयामसि।।**

कलशस्थापन—**ॐ आजिंघ्रकलशंमह्यात्त्वाविशन्त्त्विन्दवः।। पुनरूर्ज्जानिवर्त्तस्वसानः सहस्रंधुक्ष्वोरुधारापयस्वतीपुनर्म्माविशताद्द्रयिः।।**

कलश में जल भरना—**ॐ वरुणस्योत्तम्भनमसिवरुणस्यस्कम्भसर्ज्जनीस्थो वरुणस्यऽऋतसदन्न्यसिवरुणस्यऽऋतसदनमसिवरुणस्यऽऋतसदनमासीद।**

कलश में गन्ध डाले—ॐ त्वाङ्गन्धर्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः॥ त्वामौषधेसोमोराजाविद्वान्यक्ष्मादमुच्च्यत॥

कलश में सर्वौषधी डाले—ॐ याओषधीः पूर्वाजातादेवेब्भ्यस्त्रियुगंपुरा॥ मनैनु बब्भ्रुणामहꣳशतंधामानि सप्त च॥

कलश में दूर्वा डाले—ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्प्परि॥ एवानो दूर्व्वेप्प्रतनुसहस्रेण शतेन च॥

कलश में पञ्चपल्लव डाले—ॐ अश्वत्थेवोनिषदनंपर्ण्णेवोवसतिष्कृता॥ गोभाजइत्किलासथयत्सनवथपूरुषम्॥

कलश में कुश डाले—ॐ पवित्रेस्त्थोवैष्णव्व्यौसवितुर्व्वःप्प्रसवऽउत्पुनाम्म्यच्छिद्रेण पवित्रेणसूर्य्यस्यरश्मिम्भिः॥ तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामःपुनेतच्छकेयम्॥

कलश में सप्तमृत्तिका डाले—ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी॥ यच्छानः शर्म्मसप्प्रथाः॥

कलश में पूंगीफल डाले—ॐ याः फलिनीर्य्याऽअफलाऽअपुष्पायाश्च- पुष्पिणीः॥ बृहस्प्पतिप्प्रसूतास्तानोमुञ्चन्त्वꣳहसः॥

कलश में पञ्चरत्न डाले—ॐ परिवाजपतिःकविरग्निर्हव्व्यान्यक्रमीत्॥ दधद्रत्नानि दाशुषे॥

कलश में हिरण्य (सुवर्णखण्ड) डाले—ॐ हिरण्यगर्ब्भःसमवर्त्तताग्रेभूतस्य- जातःपतिरेकऽआसीत्॥ सदाधारपृथिवीद्यामुतेमांकस्मैदेवायहविषाविधेम्॥

युग्मवस्त्राच्छादन—ॐ सुजातोज्योतिषासहशर्म्मवरूथमासदत्स्वः॥ वासोअग्ग्रे विश्वरूपꣳ संव्ययस्वविभावसो॥

पूर्णपात्रस्थापन—ॐ पूर्ण्णादर्विपरापतसुपूर्ण्णापुनरापत॥ वस्नेवविक्रीणावहाऽ इषमूर्ज्जꣳशतक्रतो॥

नारिकेलफलस्थापन—ॐ याःफलिनीर्य्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः॥ बृहस्प्पतिप्प्रसूतास्तानोमुञ्चन्त्वꣳहसः॥

वरुण का ध्यान, आवाहन और पञ्चोपचारपूजन—ॐ तत्त्वायामिब्ब्रह्मणावन्दमान- स्तदाशास्तेयजमानोहविर्ब्भिः॥ अहेडमानोवरुणेहबोध्युरुशꣳसमानऽआयुः प्प्रमोषीः॥

अस्मिन् कलशे वरुणं साङ्गं सपरिवारं सवाहनं सायुधं सशक्तिकं आवाहयामि स्थापयामि। कलशे वरुणाद्यावाहितविष्णवादिदेवताः प्रतिष्ठिताः वरदाः भवन्तु। ॐ अपांपते वरुणाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

गङ्गाद्यावाहनम्—

कला कला हि देवानां दानवानां कला कलाः।
संगृह्य निर्मितो यस्मात्कलशस्तेन कथ्यते॥१॥
कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः।
मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥२॥
कुक्षौ तु सागराः सप्त सप्तद्वीपा च मेदिनी।
अर्जुनी गोमती चैव चन्द्रभागा सरस्वती॥३॥
कावेरी कृष्ण वेणा च गङ्गा चैव महानदी।
तापी गोदावरी चैव माहेन्द्री नर्मदा तथा॥४॥
नदाश्च विविधा जाता नद्यः सर्वास्तथापराः।
पृथिव्यां यानि तीर्थानि कलशस्थानि तानि वै॥५॥
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः।
आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः॥६॥
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः।
अङ्गैश्च सहिताः सर्वे कलशाम्बुं समाश्रिताः॥७॥
अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा।
आयान्तु देवपूजार्थं दुरितक्षयकारकाः॥८॥

ॐ अनया पूजया वरुणाद्यावाहित देवताः प्रीयन्तां न मम॥

कलशप्रतिष्ठा—दोनों हाथ से स्पर्श करके प्रतिष्ठा करे—

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टंय्यज्ञꣳसमिमन्दधातु॥ विश्श्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठ॥

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणा क्षरन्तु च।
अस्यै देवत्वमर्चायै मामहेति च कश्चन॥

कलशप्रार्थना—पञ्चोपचार पूजनकर प्रार्थना करे—

ॐ देवदानवसम्वादे मथ्यमाने महोदधौ।
उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम्॥१॥
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः॥२॥
शिवः स्वयं त्वमेवाऽसि विष्णुस्त्वं प्रजापतिः।
आदित्या वसवो रुद्रा विश्वेदेवाः स पैतृकाः॥३॥
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव!॥४॥

सर्वकामसमृद्ध्यर्थं अक्षयवरदायकम्।
सान्निध्यं कुरु मे देव! प्रसन्नो भव सर्वदा॥५॥
नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय।
सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते॥६॥
पाशपाणे! नमस्तुभ्यं पद्मिनीजीवनायक!।
यावत्कर्मसमाप्तिस्यात्तावत्त्वं सन्निधो भव॥७॥

कलश के ऊपर नारियल रखकर उस पर असंख्यातरुद्रों का आवाहन तथा अधोलिखित मन्त्र से प्रतिष्ठा करे।

असङ्ख्यातरुद्रावाहनम्—**ॐ असङ्ख्याता सहस्राणि येरुद्राऽअधिभूम्याम्॥ तेषाँ सहस्रयोजनेऽवधन्वानितन्मसि॥**

ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः असंख्यातरुद्रान् आवाहयामि स्थापयामि।

असङ्ख्यातरुद्रप्रतिष्ठा—दोनों हाथ से स्पर्श करके प्रतिष्ठा करे—

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टंय्यज्ञᳬसमिमन्दधातु॥ विश्श्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठ॥

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च।
अस्यै देवत्वमर्चायै मामहेति च कश्चन॥

ॐ भूर्भुवः स्वः असंख्यातरुद्राः सुप्रतिष्ठिता भवन्तु॥

अर्चन-पूजनम्

ध्यानम्—दोनों हाथ से पुष्प लेकर ध्यान करे—

ॐ नमस्तेरुद्रमन्यवऽउतोतऽइषवेनमः॥ बाहुब्भ्यामुतते नमः॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः ध्यानार्थे पुष्पाणि समर्पयामि।

आसनम्—दोनों हाथ से अक्षत लेकर आसन का ध्यान कर समर्पित करे–

ॐ यातेरुद्रशिवातनूरघोरापापकाशिनी॥ तयानस्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः आसनार्थे अक्षतान् समर्पयामि।

पाद्यम्—दोनों हाथ से पाद्यपात्र लेकर समर्पित करे—

ॐ यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे॥ शिवाङ्गिरित्रताङ्कुरुमाहिᳬसीःपुरुषञ्जगत्॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः पादयोः पाद्यं समर्पयामि।

अर्घ्यम्—दोनों हाथ से अर्घ्यपात्र लेकर समर्पित करे—

ॐ शिवेनवचसात्त्वागिरिशाच्छावदामसि॥ यथानःसर्वमिज्जगदयक्ष्मꣳसुमनाऽ-असत्॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः अर्घ्यं समर्पयामि।

आचमनम्—दोनों हाथ से आचमनीयपात्र लेकर आचमनीय जल समर्पित करे—

ॐ अद्ध्यवोचदधिवक्ताप्प्रथमोदैव्योभिषक्॥ अहींश्चसर्वाञ्जम्भयन्त्सर्वांश्च यातुधान्योधराचीःपरासुव॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः आचमनार्थे गङ्गोदकं समर्पयामि।

स्नानीयम्—दोनों हाथ से स्नानीयपात्र लेकर स्नानीय जल समर्पित करे—

ॐ असौयस्ताम्म्रोऽअरुणऽउतबब्भ्रुःसुमङ्गलः॥ येचैनꣳरुद्राऽअभितोदिक्षु-श्रिताःसहस्रशोवैषाꣳहेडऽईमहे॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः स्नानीयं जलं समर्पयामि।

पुनराचमनीयम्—दोनों हाथ से आचमनीय जल लेकर समर्पित करे—

ॐ असौयोवसर्प्पतिनीलग्ग्रीवोविलोहितः॥ उतैनङ्गोपाऽअदृश्श्रन्नदृश्श्रन्नुद-हार्य्यःसदृष्टोमृडयातिनः॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः पुनराचमनार्थे गङ्गोदकं समर्पयामि।

पयःस्नानम्—दोनों हाथ से पयःपात्र लेकर समर्पित करे—

ॐ पयः पृथिव्यांपयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः॥ पयस्वतीःप्प्रदिशः सन्तुमह्यम्॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः पयःस्नानं समर्पयामि। पयःस्नानान्ते शुद्धोदकस्नानं समर्पयामि तदन्ते आचमनीयं जलं समर्पयामि।

दधिस्नानम्—दोनों हाथ से दधिपात्र लेकर समर्पित करे—

ॐ दधिक्राव्णोऽअकारिषंजिष्णोरश्वस्यवाजिनः॥ सुरभिनोमुखाकरत्त्प्रणऽ आयूꣳषितारिषत्॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः दधिस्नानं समर्पयामि। दधिस्नानान्ते शुद्धोदकस्नानं समर्पयामि तदन्ते आचमनीयं जलं समर्पयामि।

घृतस्नानम्—दोनों हाथ से घृतपात्र लेकर समर्पित करे—

ॐ घृतम्मिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतम्वस्यधाम॥ अनुष्वधमावहमादयस्व स्वाहाकृतंवृषभवक्षिहव्यम्॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः घृतस्नानं समर्पयामि। घृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि तदन्ते आचमनीयं जलं समर्पयामि।

मधुस्नानम्—दोनों हाथ से मधुपात्र लेकर समर्पित करे—

ॐ मधुवाताऽऋतायतेमधुक्षरन्तिसिन्धवः॥ माद्ध्वीर्न्नःसन्त्वोषधीः॥ मधुनक्त मुतोषसोमधुमत्त्पार्थिवꣳरजः॥ मधुद्यौरस्तुनःपिता॥ मधुमान्नोवनस्प्पतिर्म्मधुमाँऽअस्तु

सूर्ब्यः॥ माद्ध्वीर्ग्गावौभवन्तुनः॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः मधुस्नानं समर्पयामि। मधुस्नानान्ते शुद्धोदकस्नानं समर्पयामि तदन्ते आचमनीयं जलं समर्पयामि।

शर्करास्नानम्—दोनों हाथ से शर्करापात्र लेकर समर्पित करे—

ॐ अपाꣳरसमुद्द्वयसꣳसूर्य्येसन्तꣳसमाहितम्॥ अपाꣳरसस्यय्योरसस्तंवोगृह्णाम्युत्तममुपयामगृहीतोऽसीन्द्रायत्त्वाजुष्टंगृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टतमम्॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः शर्करास्नानं समर्पयामि। शर्करास्नानान्ते शुद्धोदकस्नानं समर्पयामि तदन्ते आचमनीयं जलं समर्पयामि।

पञ्चामृतस्नानम्—दोनों हाथ से पञ्चामृतपात्र लेकर समर्पित करे—

ॐ पञ्चनद्द्यःसरस्वतीमपियन्तिसस्रोतसः॥ सरस्वतीतुपञ्चधासोदेशेभवत्सरित्॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः मिलितपञ्चामृतस्नानं समर्पयामि।

शुद्धोदकस्नानम्—दोनों हाथ से जलपात्र लेकर समर्पित करे—

ॐ शुद्धवालः सर्वशुद्धवालोमणिवालस्तऽआश्विनाःश्येतःश्येताक्षोरुणस्तेरुद्राय पशुपतयेकर्ण्णायामाऽअवलिप्तारौद्रानभोरूपाःपार्ज्जन्याः॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः शुद्धोदकस्नानं समर्पयामि।

वस्त्रनिवेदनम्—दोनों हाथ से वस्त्र लेकर समर्पित करे—

ॐ नमोस्त्तुनीलग्ग्रीवायसहस्राक्क्षायमीढुषे॥ अथोयेऽअस्यसत्त्वानो करन्नमः॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः वस्त्रं समर्पयामि।

वस्त्राङ्गाचमनीयजलम्—दोनों हाथ से आचमनीय लेकर समर्पित करे—

ॐ आपोहिष्ठामयोभुवस्तानऽऊर्जेदधातन॥ महेरणायचक्षसे॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः वस्त्रान्ते आचमनीयं जलं समर्पयामि।

उपवस्त्रनिवेदनम्—दोनों हाथ से उपवस्त्र लेकर समर्पित करे—

ॐ प्रमुञ्चधन्न्वनस्त्वमुभयोरात्न्योर्ज्ज्याम्॥ याश्च्चतेहस्तऽइषवःपराताभगवोवप॥ ॐ सुजातोज्योतिषासहशर्म्मवरूथमासदत्स्वः॥ वासोअग्ग्रेविश्श्वरूपꣳसंव्ययस्वविभावसो॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः उपवस्त्रं समर्पयामि।

उपवस्त्राङ्गाचमनीयजलम्—दोनों हाथ से आचमनीय जल लेकर समर्पित करे—

ॐ योवःशिवतमोरसस्तस्यभाजयतेहनः॥ उशतीरिवमातरः॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः उपवस्त्रान्ते आचमनीयं जलं समर्पयामि।

यज्ञोपवीतनिवेदनम्—दोनों हाथ से यज्ञोपवीत लेकर समर्पित करे—

ॐ विज्ज्यन्धनुःकपर्द्दिनोविशल्ल्योबाणवाँ२॥ऽउत॥ अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः॥ ॐ यज्ञोदेवानाम्प्प्रत्त्येतिसुम्म्नमादित्त्यासोभवतामृडयन्तः॥

आवो॒र्वाचीसुम॒तिर्वैवृत्त्यादु॒ह्होश्चि॒द्याववरिवो॒वित्त॒रासंदादित्त्येभ्यस्त्वा॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः यज्ञोपवीतं समर्पयामि।

यज्ञोपवीताङ्गाचमनीयम्—दोनों हाथ से आचमनीय जल समर्पित करे—

ॐ तस्मा॒ऽअरंङ्गमामवो॒यस्य॒क्षया॑य॒जिन्न्वथ॥ आपोजनयथाचनः॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः यज्ञोपवीतान्ते आचमनीयं समर्पयामि।

सुगन्धिद्रव्यसमर्पणम्—दोनों हाथ से सुगन्धिद्रव्य लेकर समर्पित करे—

ॐ त्वाङ्गन्धर्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः॥ त्वामोषधेसोमो॒राजाविद्वान्य क्ष्मादमुच्च्यत॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः गन्धानुलेपनं समर्पयामि।

अक्षतसमर्पणम्—दोनों हाथ से अक्षत लेकर समर्पित करे—

ॐ अक्षन्नमीमदन्तह्यवप्प्रियाऽअधूषत॥ अस्तोषत॒स्वभानवो॒विप्प्रा॒नविष्ठयामती योजान्विन्द्रते॒हरी॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः अलङ्करणार्थे अक्षतान् समर्पयामि।

पुष्पमालासमर्पणम्—दोनों हाथ से पुष्पमाला लेकर समर्पित करे—

ॐ ओषधी॒प्प्रतिमोद्दध्वंपुष्प्पवतीःप्रसूवरीः॥ अश्श्वाऽइवस॒जित्त्वरीर्वीरुधः पारयि॒ष्ष्णवः॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः पुष्पमालां परिधापयामि।

दूर्वासमर्पणम्—दोनों हाथ से दूर्वा लेकर समर्पित करे—

ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषष्प्परि॥ एवानोदूर्वेप्प्रतनुसहस्रेणशतेन च॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः दूर्वाङ्कुरान् समर्पयामि।

नानापरिमलद्रव्यसमर्पणम्—दोनों हाथ से अबीरबुक्का लेकर समर्पित करे—

ॐ अहिरिवभो॒गैःपर्य्येतिबा॒हुंज्याया॑हेतिम्परि॒बाधमानः॥ हुस्त॒घ्नोविश्श्वा-व॒युनानिवि॒द्वान्पुमा॒न्पुमा॑ᳪसंपरिपातुवि॒श्श्वतः॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः नानापरिमलद्रव्याणि समर्पयामि।

सिन्दूरसमर्पणम्—दोनों हाथ से सिन्दूर लेकर समर्पित करे—

ॐ सिन्धोरिवप्प्राद्ध्वनेशूघनासो॒वातप्प्रमियःपतयन्तियह्वाः॥ घृतस्य॒धाराऽ अरुषोनवा॒जीकाष्ठाभि॒न्दन्नूर्म्मिभिःपिन्न्वमानः॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः सिन्दूराभरणं समर्पयामि। ततः नैवेद्यं पुरतः संस्थाप्य धूपदीपौ प्रज्वाल्य।

धूपसमर्पणम्—दोनों हाथ से धूपपात्र लेकर समर्पित करे—

ॐ यातेहे॒तिम्मीढुष्ट्टमहस्तेबभूवते॒धनुः॥ तया॒स्म्मान्वि॒श्श्वत॒स्त्वमयक्ष्मया॒परि भुज॥ ॐ धूरसि॒धूर्व॒धूर्वन्तंधूर्वतं॒योऽस्मान्धूर्वतितंधूर्व॒यंव॒यंधूर्वामः॥ दे॒वानामसि॒वह्नितमंसस्नितमंपप्रितमंजुष्टतमंदेवहूतमम्॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः धूपं समर्पयामि।

दीपसमर्पणम्—दोनों हाथ से दीपपात्र लेकर समर्पित करे—

ॐ परितेधन्न्वनोहेतिरस्म्मान्न्वृमक्क्तुव्विश्श्वतः॥ अथोयऽइषुधिस्त्तवारेऽअस्म्मन्निधेहितम्॥ ॐ अग्ग्निर्ज्ज्योतिज्ज्योतिरग्ग्निः स्वाहासूर्य्योज्ज्योतिज्ज्योतिः सूर्य्यः स्वाहा॥ अग्ग्निर्व्वर्च्चोज्ज्योतिर्व्वर्च्चः स्वाहासूर्य्योव्वर्च्चोज्ज्योतिर्व्वर्च्चः स्वाहा॥ ज्ज्योतिः सूर्य्यः सूर्य्योज्ज्योतिः स्वाहा॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः दीपज्योतिं समर्पयामि।

नैवेद्यसमर्पणम्—दोनों हाथ से नैवेद्यपात्र लेकर समर्पित करे—

ॐ अवतत्त्यधनुष्ट्वꣳसहस्स्राक्क्षशतेषुधे॥ निशीर्य्यशल्ल्यानाम्मुखाशिवोनः सुमनाभव॥ ॐ अन्नपतेऽन्नस्यनोदेह्यनमीवस्यशुष्मिणः॥ प्रप्रदातारंतारिषऊर्ज्जन्नो धेहिद्विपदेचतुष्पदे॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः नैवेद्यं समर्पयामि। ॐ प्राणाय स्वाहा। ॐ अपानाय स्वाहा। ॐ समानाय स्वाहा। ॐ उदानाय स्वाहा। ॐ व्यानाय स्वाहा। मध्ये पानीयं जलं उत्तरापोशनं समर्पयामि।

करोद्वर्तनसमर्पणम्—दोनों हाथ से करोद्वर्तन लेकर समर्पित करे—

ॐ अꣳशुनातेअꣳशुः पृच्च्यतांपरुषापरुः॥ गन्धस्तेसोममवतुमदायरसो-अच्च्युतः॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः करोद्वर्तनार्थे चन्दनानुलेपनं समर्पयामि।

ताम्बूलादिसमर्पणम्—दोनों हाथ से ताम्बूल लेकर समर्पित करे—

ॐ नमस्त्तऽआयुधायानाततायधृष्णवे॥ उभाब्भ्यामुततेनमोबाहुब्भ्यान्तव-धन्न्वने॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः मुखशुद्ध्यर्थे पूङ्गिफलमेलालवङ्ग-नागवल्लीदलादिसहितंताम्बूजवीटिकां समर्पयामि।

फलादिसमर्पणम्—दोनों हाथ से फलपात्र लेकर समर्पित करे—

ॐ याः फलिनीर्य्याऽअफलाऽअपुष्प्यायाश्श्चपुष्प्पिणीः॥ बृहस्प्पतिप्प्रसूतास्तानो मुञ्चत्वꣳहसः॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः ऋतुकालोद्भवफलानि समर्पयामि।

दक्षिणासमर्पणम्—दोनों हाथ से दक्षिणा लेकर समर्पित करे—

ॐ हिरण्ण्यगर्ब्भः समवर्त्ततागे्रभूतस्यजातः पतिरेकऽआसीत्॥ सदाधारपृथिवी-द्यामुतेमांकस्मैदेवायहविषाविधेम्॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः कृतायाः पूजायाः साद्‌गुण्यार्थे द्रव्यदक्षिणां समर्पयामि।

नीराजनसमर्पणम्—दोनों हाथ से नीराजन लेकर घुमाये—

ॐ आरात्रिपार्थिवꣳरजः पितुरप्प्रायिधामभिः॥ दिवः सदाꣳसिबृहतीवितिष्ठसऽआत्त्वेषंव्वर्त्ततेतमः॥ ॐ इदꣳहविः प्रजननंमेऽअस्तुदशवीरꣳसर्व्वगणꣳस्वस्तये॥ आत्मसनिप्प्रजासनिपशुसनिलोकसन्न्यभयसनि॥ अग्ग्निः प्प्रजांबहुलांमेकरोत्वन्नंपयो

रेतोंऽअुस्म्मासुधत्त॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः कर्पूरनीराजनं समर्पयामि।

पुष्पाञ्जलिसमर्पणम्—दोनों हाथ से पुष्प लेकर समर्पित करे—

ॐ मानस्तोकेतनयेमानुऽआयुषिमानोगोषुमानोऽअश्श्वेषुरीरिषः॥ मानोवीरान्नुद्र भामिनोव्वधीर्हविष्म्मन्तुःसदुमित्त्वाहवामहे॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः मन्त्र पुष्पाञ्जलिं समर्पयामि।

परिक्रमासमर्पणम्—दोनों हाथ से पुष्प लेकर समर्पित करे—

ॐ मानोमुहान्तमुतमानोऽअर्ब्भकम्मानुऽउक्क्षन्तमुतमानऽउक्क्षितम्॥ मानोव्वधीः पितरम्मोतमातरम्मानः प्प्रियास्तुन्न्वोरुद्द्ररीरिषः॥ ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः परिक्रमां समर्पयामि।

परिक्रमा के पश्चात् जल, गन्ध, अक्षत, फल, पुष्प, दूर्वा, कुशा, दधि, दुग्ध, सर्षपादि द्रव्यों को अर्घ्यपात्र में लेकर विशेषार्घ्य प्रदान करे।

विशेषार्घ्यसमर्पणम्—दोनों हाथ सें विशेषार्घ्य लेकर समर्पित करे—

करचरणकृतं वा कायजं कर्मजं वा,
श्रवणनयनजं वा मानसं वा पराधम्।
विहितमविहितं वा सर्वमेतत् क्षमस्व,
जय जय करुणाब्धे श्रीमहादेव शम्भो॥

ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः **विशेषार्घ्यं समर्पयामि।**

प्रार्थना—दोनों हाथों में पुष्प लेकर प्रार्थना करे—

न तापस्त्रिविधस्तेषां न शोको न रुजादयः।
ग्रहगोचरपीडां च तेषां क्वाऽपि न विद्यते॥१॥
श्रीः प्रज्ञाऽऽरोग्यमायुष्यं सौभाग्यं भाग्यमुन्नतिम्।
विद्यांधर्ममतिः शम्भोर्भक्तिस्तेषां न संशयः॥२॥

ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः प्रार्थनां समर्पयामि।

पूजनसमर्पणम्—दाहिने हाथ में जल लेकर पूजन समर्पित करे—

ॐ भूर्भुवः स्वः असंख्यातरुद्रेभ्यो नमः अनया पूजया असंख्यातरुद्राः प्रीयन्तान्न मम् ॥

असंख्यातरुद्राणां पूजनं परिपूर्णम्

❀

कुशकण्डिकाविधिः

अग्ग्रेर्दक्षिणतो ब्रह्मणः स्थापनार्थं ब्रह्मासनम्। अग्नि के दक्षिण ब्रह्मा के लिए आसन रखे।

अग्नेरुत्तरतः प्रणीतासनद्वयम्। अग्न्योत्तर प्रणीताप्रोक्षणी के लिए दो आसन रखे।

ब्रह्मासने ब्रह्मोपवेशनम्। ब्रह्मासन पर वृणीत ब्रह्मा को स्थापित करे।

यजमान बोले—**यावत्कर्म समाप्यते तावत् त्वं ब्रह्मा भव।**

ब्रह्मा बोले—**भवामि।**

ततो ब्रह्मणाऽनुज्ञातः प्रणीता प्रणयनम्। ब्रह्मा के आदेश से प्रणिताप्रणयन करे।

तद्यथा–प्रणीता पात्रं पुरतः कृत्वा, वारिणा परिपूर्य, कुशैराच्छाद्य, प्रथमासने निधाय, ब्रह्मणो मुखमवलोक्य, द्वितीयासने निदध्यात्। प्रणीता पात्र में जल भर करके, कुशाओं से ढ़क करके, पहले प्रथम आसन पर रख कर, ब्रह्मा का मुख देख करके, दूसरे आसन पर रखें।

ईशानादि पूर्वाग्रैः कुशैः परिस्तरणम्। ईशान कोण तथा पूर्व की तरफ कुश का अग्रभाग करके कुण्ड के चारो तरफ परिस्तरण करे।

तद्यथा—ततो बर्हिषश्चतुर्थ भागमादाय। आग्नेयादीशानान्तम्, उदगग्रैर्वा। अग्नितः प्रणीता पर्यन्तं प्रागग्रैः, इतरथा वृत्तिः।

जैसे—बर्हिमात्र कुशा का चतुर्थ भाग लेकर पूर्व दिशा में उत्तराग्र कुश बिछाये, उत्तरदिशा अग्नि से प्रणीतापात्र के बीच में पूर्वाग्र कुशाओं को बिछाये, पश्चिम दिशा में नैर्ऋत्य कोण से वायव्य कोण तक उत्तराग्र कुशा बिछाये, दक्षिण में नैर्ऋत्य कोण से ब्रह्मा के बीच पूर्वाग्र तथा ब्रह्मा से अग्नि कोण तक पूर्वाग्र कुशाओं को बिछाये इसी प्रकार पुनः दूसरी आवृत्ति से परिस्तरण करे।

पात्रासादनं कुर्यात्। तद्यथा त्रीणि पवित्रे द्वे। प्रोक्षणीपात्रम्। आज्यस्थाली। चरुस्थाली। सम्मार्जनकुशाः पञ्च। उपयमन कुशाः सप्त। समिधस्तिस्रः। स्रुवः। आज्यम्। तण्डुलाः। पूर्णपात्रम्। उपकल्पनीयानि वृषनिष्क्रयदक्षिणा। उप-कल्पनीयानि द्रव्याणि निधाय।

पात्रासादन—पवित्री बनाने के लिए तीन कुशा तथा दो कुशा रखे, प्रोक्षणी पात्र, घृत पात्र, चरु पात्र, सम्मार्जन के लिए पाँच कुशा, उपयमन के लिए सात कुशा, तीन सीधी

विलस्त मात्र समिधा, स्रुवा, घृत, चावल, पूर्णपात्र, कल्पित बैल का मूल्य, अन्य हवनीय पदार्थ सभी क्रम से रखे।

पवित्रच्छेदनाति–द्वयोरुपरि त्रीणि निधाय। द्वौ मेलेन प्रदक्षिणी कृत्य, सर्वान् युगपदनामिकाङ्गुष्ठाभ्यां धृत्वा। त्रिभिश्छिद्य। द्वौ ग्राह्यौ, त्रिस्त्याज्यः। प्रोक्षणी पात्रे प्रणीतोदकमासिच्य, त्रिः पूर्णं, पवित्राभ्यामुत्पवनम्। प्रोक्षण्याः सव्यहस्त करणम्। दक्षिणेनोद्दिङ्गनम्।

पवित्रीछेदन—दोकुशा पर तीन कुशा को रख कर, दो कुशा को मिला कर प्रदक्षिणा क्रम से घुमाकर सभी को अनामिका, अङ्गुष्ठ से पकड़कर कुशाओं का छेदन कर,तीन कुशा का त्याग कर,दो कुशा का ग्रहण कर पवित्री बना कर पवित्री से प्रणीता के पात्र से प्रोक्षणी पात्र का तीन बार सिंचन कर जल भर कर उसमें पवित्री रख दें। प्रोक्षणी पात्र को वायें हाथ में रख कर दाहिने हाथ से ढ़क कर यथा स्थान रखें।

ततः प्रणीतोदकेन प्रोक्षणी प्रोक्षणम्। प्रोक्षण्युदकेन आज्यस्थाल्याः प्रोक्षणम्। चरुस्थाल्याः प्रोक्षणम्। सम्मार्जनकुशानां प्रोक्षणम्। उपयमनकुशानां प्रोक्षणम्। समिधानां प्रोक्षणम्। स्रुवस्य प्रोक्षणम्। आज्यस्य प्रोक्षणम्। तण्डुलानां प्रोक्षणम्। पूर्णपात्रस्य प्रोक्षणम्। उपकल्पनीयानां पदार्थानां प्रोक्षणम्। असञ्चरे प्रोक्षणी निधाय।

प्रणीता के जल से प्रोक्षणी का प्रोक्षण कर, प्रोक्षणी पात्र में प्रणीता पात्र से जल ग्रहण कर प्रोक्षणी पात्र के जल से पवित्री के द्वारा घृतपात्र, चरु स्थली, सम्मार्जन कुशा, उपयमन कुशा, समिधा, स्रुवा, घृत, चावल, पूर्णपात्र, तथा अन्य सभी सामग्रियों का प्रोक्षण करके प्रोक्षणी पात्र को यथा स्थान रखें।

आज्यस्थाल्यामाज्यनिर्वापः। चरुस्थाल्यां प्रणीतोदकात्सेचन पूर्वकं तण्डुल प्रक्षेपः। ब्रह्मणोदक्षिणत आज्याधिश्रयणम्। चरोरधिश्रयणं स्वयमाज्यस्योत्तरतः। ज्वलदुल्मुकेनोभयोः पर्यग्निकरणम्। इतरथावृत्तिः। उदकोस्पर्षः। अर्धश्रिते चरौः, अधोमुखस्य स्रुवस्य प्रतपनम्। सम्मार्जनकुशैः स्रुवस्योर्ध्वमुखस्य सम्मार्जनम्। अग्रैरन्तरतो मूलैर्बाह्यतः स्रुवस्य समृज्य। प्रणीतोदकेनाऽभ्युक्षणम्। सम्मार्जन कुशानामग्नौ प्रक्षेपः।

घृतपात्र में घृत निकाल लें, चरुस्थाली को प्रणीता के जल से सिंचन करके उसमें खीर बनाने के लिए चावल निकालें, ब्रह्मा के दक्षिण से लाकर घृत को अग्नि के दक्षिण रखें, चरु को पकने के लिए अग्नि पर रखें, जलती हुई लकड़ी लेकर ईशान कोण से प्रारम्भ कर ईशान पर्यन्त घुमाकर पुनः विपरीत क्रम से घुमा कर अग्नि में डाल दें, आधे पके चरु को चलाये, स्रुवा को नीचे की तरफ मुख करके तपा कर, आधे पके चरु को चलाये,

सम्मार्जन कुशा के द्वारा प्रणीता के जल से उर्ध्वमुख स्रुवा का मार्जन कर, स्रुवा के अग्रभाग को कुशाग्र से तथा स्रुवमूल का कुशमूल से मर्दन कर प्रणीता के जल से अभ्युक्षण कर फिर से तपा कर अग्नि ब्रह्मा के मध्य रखे तथा सम्मार्जन कुशा का अग्नि में प्रक्षेप करे।

पुनः प्रतपनं, दक्षिण देशे निधानम्। आज्यस्योद्वासनम्। चरुं पूर्वेणानीयाऽग्नेरुत्तरतः स्थापयेत्। चरोरुद्वासनम्। अग्नेरुत्तरत एवाज्यस्य प्रदक्षिणीकृत्य, आज्यस्योत्तरतश्चरुं स्थापयेत्।

घृत को लाकर अग्नि के उत्तर में रखें, चरु को अग्नि से उतार कर अग्नि की प्रदक्षिणा करते हुए दक्षिण में रखे तथा घृत को भी प्रदक्षिणा क्रम से लाकर चरु के उत्तर रखे।

आज्योत्पवनम्। आज्यावेक्षणम्। अपद्रव्य निरसनम्। पुनः प्रोक्षुण्युत्पवनम्। वामहस्ते उपयमनकुशामादाय। उत्तिष्ठन् समिधोभ्यादाय, घृताक्ताः समिधस्तिस्रः अग्नौ क्षिपेत्। प्रोक्षण्युदकेन सपवित्रहस्तेन ईशानादि अग्नेः प्रदक्षिणं प्रर्युक्षणम्। इतरथावृतिः। पवित्रयोः प्रणीतासु निधानम्। दक्षिणं जान्वाच्य, ब्रह्मणा कुशैरन्वारब्धः। समिद्धतमेऽग्नौ स्रुवेणाज्य होमः।

घृत पात्र में घृत निकाले तथा घृत का निरीक्षण कर अपद्रव्य निकाले, पुनः प्रोक्षणी के जल से सिंचन करे। वायें हाथ मे उपयमन कुशा लेकर, खड़े होकर तीन समिधाओं को घृत में डुबाकर कर मौन ही अग्नि में प्रक्षेप करे। पवित्री के सहित प्रोक्षणी को लेकर जल गिराते हुए ईशान कोण से प्रारम्भ कर ईशान पर्यन्त घुमाकर पुनः विपरीत क्रम से घुमा कर यथा स्थान रखे। पवित्री को प्रणीता में रखे, दक्षिण जानू को भूमि पर रख कर, ब्रह्मा को कुशाओं से स्पर्श कर स्रुवा से घृत आहुति प्रदान करे।

अग्नेरुत्तरभागे—अग्नि के उत्तर भाग में आहुति प्रदान करे।

ॐ प्रजापतये स्वाहा।

इदं प्रजापतये न मम। एक बूँद प्रोक्षणी पात्र में प्रक्षेप करे।

अग्नेर्दक्षिणभागे—अग्नि के दक्षिण भाग में आहुति प्रदान करे।

ॐ इन्द्राय स्वाहा।

इदं इन्द्राय न मम। एक बूँद प्रोक्षणी पात्र में प्रक्षेप करे।

समिद्धतमे—अग्नि के मध्य समिधा में आहुति प्रदान करे।

ॐ अग्नये स्वाहा।

इदमग्नये न मम। एक बूँद प्रोक्षणी पात्र में प्रक्षेप करे।

ॐ सोमाय स्वाहा।

इदं सोमाय न मम। एक बूँद प्रोक्षणी पात्र में प्रक्षेप करे।

ततः सूर्यादि ग्रहाणां तथा च अधिदेवताप्रत्याधिदेवतापञ्चलोकपाल-वास्तोष्पतिक्षेत्रपालदेवतानां इन्द्रादिदशदिक्पालदेवतानां प्रधानदेवतां तथा च आवाहितदेवतानां प्रत्येकं सम्मिलित तिलादिद्रव्यैः जुहुयात्।

कुशकण्डिका करने के बाद सूर्यादि ग्रहों तथा अधिदेवता प्रत्यधिदेवता पञ्चलोकपाल वास्तोष्पति क्षेत्रपाल देवताओं के साथ दिग्पालादि देवताओं तथा प्रधान देवता के लिए तिलादि मिश्रित द्रव्य से हवन करे।

कुशकण्डिकाविधिः परिपूर्णम्

हवनम्

सङ्कल्पः—ॐ तत्सदद्य पूर्वोच्चारितग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकनामाऽहं अस्मिन् स्वर्णाकर्षणभैरवप्रयोगकर्मणि इमानि हवनीय द्रव्याणि या या यक्ष्यमाण देवतास्ताभ्यस्ताभ्यो मया परित्यक्तं न मम। यथा दैवतानि सन्तु।

ग्रहमण्डलस्थदेवायहवनम्

सङ्कल्पः—ॐ तत्सदद्य पूर्वोच्चारितग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकनामाऽहं अस्मिन् आपदुद्धारणभैरवप्रयोगकर्मणि ग्रहमण्डलस्थदेवताय हवनं करिष्ये।

ॐ आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतंमर्त्यंच॥ हिरण्यैनसवितारथेनादेवोयाति-भुवनानिपश्यन्॥ सूर्याय स्वाहा॥

ॐ इमंदेवाऽअसपत्नकँ सुवद्धमहतेक्षत्रायमहतेज्यैष्ठ्यायमहतेजानराज्ज्यास्ये-न्द्रियाय॥ इममुमुष्ष्यपुत्रममुष्यैपुत्रमस्यैविशऽएषवोऽमीराजासोमोऽस्माकँ-ब्ब्राह्मणानाँराजा॥ सोमाय स्वाहा॥

ॐ अग्निर्मूर्द्धादिवः ककुत्पतिःपृथिव्याऽअयम्॥ अपाँरेताँसिजिन्वति॥ भौमाय स्वाहा॥

ॐ उद्बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्तेसँ सृजेथामयञ्च॥ अस्मिन्त्सधस्थेऽ-अध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत॥ बुधाय स्वाहा॥

ॐ बृहस्पतेऽअतिदुर्योऽअर्हाद्द्युमद्विभातिक्रतुमज्जनेषु॥ यद्दिदयच्छवसऽऋत-प्प्रजाततदस्मासुद्रविणंधेहिचित्रम्॥ बृहस्पतये स्वाहा॥

ॐ अन्नात्परिस्रुतोरसंब्ब्रह्मणाव्यपिबत्क्षत्रंपयः सोमंप्प्रजापतिः॥ ऋतेनसत्त्य-मिन्द्रियंविपानँ शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदंपयोऽमृतंमधु॥ शुक्राय स्वाहा।

ॐ शंन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये॥ शंय्योरभिस्रवन्तुनः॥ शनैश्चराय स्वाहा॥

ॐ कयानश्चित्रऽआभुवदूतीसदावृधः सखा॥ कयाशचिष्ठयाऽवृता॥ राहवे स्वाहा॥

ॐ केतुंकृण्वन्नकेतवेपेशोमर्याऽअपेशसे॥ समुषद्भिरजायथाः॥ केतवे स्वाहा॥

ॐ त्र्यम्बकंयजामहेसुगन्धिंपुष्टिवर्द्धनम्॥ उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमाऽमृतात्॥ ईश्वराय स्वाहा॥

ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम्॥ इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाण॥ उमायै स्वाहा॥

ॐ यदक्रन्दः प्प्रथमंजायमानऽउद्यन्त्समुद्रादुतवापुरीषात्॥ श्येनस्यपक्षाहरिणस्यबाहूऽउपस्तुत्त्यंमीहजातंतेऽअर्वन्॥ स्कन्दाय स्वाहा॥

ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्॥ समूढमस्यपाᳬसुरेस्वाहा॥ विष्णवे स्वाहा॥

ॐ आब्रह्मन्ब्राह्मणोब्ब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्यः शूरऽइषव्योतिव्याधीमहारथोजायतान्दोग्ध्रीधेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषाजिष्णूरथेष्ठाः सभेयोयुवास्ययजमानस्यावीरोजायतान्निकामेनिकामेनः पर्ज्जन्न्योवर्षतुफलवत्त्योनओषधयः पच्च्यन्तांयोगक्षेमोनः कल्प्पताम्॥ ब्रह्मणे स्वाहा॥

ॐ सजोषाऽइन्द्रसगणोमरुद्भिः सोमंपिबवृत्रहाशूरविद्वान्॥ जहिशत्रूँ२॥रपमृधोनुदस्वाथाभयंकृणुहिविश्श्वतोनः॥ इन्द्राय स्वाहा॥

ॐ यमायत्वाङ्गिरस्वतेपितृमतेस्वाहा॥ स्वाहाघर्म्मायस्वाहाघर्म्मः पित्रे॥ यमाय स्वाहा॥

ॐ कार्षिरसिसमुद्रस्यत्त्वाक्षित्त्याऽउन्नयामि॥ समापोऽअद्भिरग्ग्मतसमोषधीभिरोषधीः॥ कालाय स्वाहा॥

ॐ चित्रावसोस्वस्तितेपारमशीय॥ चित्रगुप्ताय स्वाहा॥

ॐ अग्निंदूतंपुरोदधेहव्यवाहमुपब्रुवे॥ देवाँ२॥आसादयादिह॥ अग्नये स्वाहा॥

ॐ आपोहिष्ठामयोभुवस्तानऽऊर्जेदधातन॥ महेरणायचक्षसे॥ अपः स्वाहा॥

ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी॥ यच्छानः शर्म्मसप्प्रथाः॥ पृथिव्यै स्वाहा॥

ॐ विष्णोरराटमसिविष्णोः श्नप्त्रेस्त्थोविष्णोः स्यूरसिविष्णोर्ध्रुवोसि॥ वैष्णवमसिविष्णवेत्त्वा॥ विष्णवे स्वाहा॥

ॐ इन्द्रआसांनेताबृहस्पतिर्द्दक्षिणायज्ञः पुरएतुसोमः॥ देवसेनानामभिभञ्जतीनांजयन्तीनांमरुतोयन्त्त्वग्ग्रम्॥ इन्द्राय स्वाहा॥

ॐ अदित्त्यैरास्नासीन्द्राण्याऽउष्णीषः॥ पूषासिघर्म्मायदीष्व॥ इन्द्राण्यै स्वाहा॥

ॐ प्रजापतेनत्वदेतान्न्यन्न्योविश्वारूपाणिपरिताबभूव॥ यत्कामास्तजुहमस्तन्नोऽअस्तुवयᳬस्यामपतयोरयीणाम्॥ प्रजापतये स्वाहा॥

ॐ नमोस्तुसर्प्पेब्भ्योयेकेचपृथिवीमनु॥ येऽअन्तरिक्षेयेदिवितेब्भ्यः सर्प्पेब्भ्यो नमः॥ सर्पेभ्यः स्वाहा॥

ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोवेनआवः॥ सबुद्ध्न्याऽउपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्चविवः॥ ब्रह्मणे स्वाहा॥

ॐ गुणानान्त्वागुणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम॥ आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम्॥ गणपतये स्वाहा॥

ॐ अम्बेऽअम्बिकेऽम्बालिकेनमानयतिकश्श्चन॥ ससस्त्यश्श्वकः सुभद्रिकाङ्काम्पीलवासिनीम्॥ दुर्गायै स्वाहा॥

ॐ व्वायोयेतेसहस्रिणोरथासस्तेभिरागहि॥ नियुत्त्वान्त्सोमपीतये॥ वायवे स्वाहा॥

ॐ घृतंघृतपावानःपिबतव्वसांव्वसापावानःपिबन्तान्तरिक्षस्यहविरसिस्वाहा॥ दिशःप्प्रदिशऽआदिशोव्विदिशऽउद्दिशोदिग्ग्भ्यःस्वाहा॥ आकाशाय स्वाहा॥

ॐ याव्वाङ्कशामधुमत्याश्श्विनासूनृतावती॥ तयायज्ञम्मिमिक्षतम्॥ अश्विभ्यां स्वाहा॥

ॐ वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोऽअनमीवोभवानः॥ यत्त्वेमहेप्रतितन्नोजुषस्वशंनोभवद्विपदेशंचतुष्पदे॥ वास्तोष्पतये स्वाहा॥

ॐ नहिस्प्पशमविदन्नन्न्यमस्म्माद्वैश्श्वानरात्पुरऽएतारमग्ग्नेः॥ एमेनमवृधन्नमृताऽअमर्त्त्यंव्वैश्श्वानरंक्षैत्रजित्त्यायदेवाः॥ क्षेत्राधिपतये स्वाहा॥

ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम्॥ ह्वयामिशक्क्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्त्विन्द्रः॥ इन्द्राय स्वाहा॥

ॐ त्वन्नोऽअग्ग्नेतवपायुभिर्म्मघोनोरक्षतन्न्वश्श्चवन्द्य॥ त्रातातोकस्यतनयेगवामस्यनिमेषꣳरक्षमाणस्तवव्व्रते॥ अग्नये स्वाहा॥

ॐ यमायत्त्वाङ्गिरस्वतेपितृमतेस्वाहा॥ स्वाहाघर्म्मायस्वाहाघर्म्मःपित्रे॥ यमाय स्वाहा॥

ॐ असुन्न्वन्तमयजमानमिच्छस्तेनस्येत्यामन्न्विहितस्क्करस्य॥ अन्न्यमस्म्मदिच्छसातऽइत्यानमोदेविनिर्ऋतेतुब्भ्यमस्तु॥ निर्ऋतये स्वाहा॥

ॐ तत्त्वायामिब्ब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्ब्भिः॥ अहेडमानोवरुणेहबोद्ध्युरुशꣳसमानऽआयुःप्प्रमोषीः॥ वरुणाय स्वाहा॥

ॐ आनोनियुद्भिःशतिनीभिरध्वरꣳसहस्रिणीभिरुपयाहियज्ञम्॥ व्वायोऽअस्म्मिन्त्सवनेमादयस्वयूयंपातस्वस्तिभिःसदानः॥ वायवे स्वाहा॥

ॐ व्वयꣳसोमव्व्रतेतवमनस्तनूषुबिब्भ्रतः॥ प्रजावन्तꣳसचेमहि॥ सोमाय स्वाहा॥

ॐ तमीशानंजगतस्तस्थुषस्प्पतिंधियञ्जिन्न्वमवसेहूमहेव्वयम्॥ पूषानोयथाव्वेदसामस धेरक्षितापायुरदब्धःस्वस्तये॥ ईशानाय स्वाहा॥

ॐ अस्मेरुद्रामेहनापर्व्वतासोव्वृत्रहत्येभरहूतौसजोषाः॥ यःशꣳसतेस्तुवतेधायिपज्ज्रऽइन्द्रज्ज्येष्ठाऽअस्म्माँ२॥ऽअवन्तुदेवाः॥ ब्रह्मणे स्वाहा॥

ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी॥ यच्छानःशर्म्मसप्प्रथाः॥ अनन्ताय स्वाहा॥

असंख्यातरुद्रायहवनम्

सङ्कल्पः—ॐ तत्सदद्य पूर्वोच्चारितग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकनामाऽहं अस्मिन् स्वर्णाकर्षणभैरवप्रयोगकर्मणि असंख्यातरुद्राय हवनं करिष्ये।

ॐ अघोरेभ्योऽथघोरेभ्योघोरघोरतरेभ्यः॥ सर्वेभ्यःसर्वशर्वेभ्योनमस्तेऽअस्तुरुद्र रूपेभ्यः स्वाहा॥ १०८ आहुति होम करे।

प्रधानदेवायहवनम्

सङ्कल्पः—ॐ तत्सदद्य पूर्वोच्चारितग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकनामाऽहं अस्मिन् स्वर्णाकर्षणभैरवप्रयोगकर्मणि स्वर्णाकर्षणभैरवाय हवनं करिष्ये।

विनियोगः—ॐ अस्य श्रीस्वर्णाकर्षणभैरवमहास्तोत्रस्य ब्रह्माऋषिः, त्रिष्टुप्-छन्दः, ब्रह्मविष्णुरुद्रत्रिमुर्तिरूपीभगवानस्वर्णाकर्षण भैरवोदेवता, ह्रींबीजं, क्लीँ-शक्तिः, सःकीलकं ममसमस्तदारिद्र्यविनाशपूर्वक समस्तकामनासिद्ध्यर्थे न्यासे हवने विनियोगः।

ऋष्यादिन्यासः—लेलिहान मुद्रा से न्यास करे—

ॐ भैरव ऋषये नमः शिरसि न्यस्यामि।

ॐ त्रिष्टुब्छन्दसे नमः मुखे न्यस्यामि।

ॐ त्रिमूर्तिरूपीभगवान श्रीस्वर्णाकर्षणभैरवदेवताभ्यो नमः हृदये न्यस्यामि।

ॐ ह्रीं बीजाय नमः गुह्ये न्यस्यामि।

ॐ सः शक्तये नमः पादयोः न्यस्यामि।

ॐ वँ कीलकाय नमः नभौ न्यस्यामि।

ॐ श्रीस्वर्णाकर्षणभैरवाय नमः सर्वाङ्गे न्यस्यामि।

करन्यासः—लेलिहान मुद्रा से न्यास करे—

ॐ ऐँ ह्रीं क्लीँ क्लूँ ह्राँ ह्रीँ ह्रूँ सः वं आपदुद्धारणाय नमः अङ्गुष्ठाभ्यां नमः।

ॐ अजामलबद्धाय नमः तर्जनीभ्यां नमः।

ॐ लोकेश्वराय नमः मध्यमाभ्यां नमः।

ॐ स्वर्णाकर्षणभैरवाय नमः अनामिकाभ्यां नमः।

ॐ ममदारिद्र्यविद्वेषणाय नमः कनिष्ठिकाभ्यां नमः।

ॐ श्रीमहाभैरवाय नमः करतलकरपृष्ठाभ्यां नमः।

हृदयादिन्यासः—लेलिहान मुद्रा से न्यास करे—

ॐ ऐँ ह्रीं क्लीँ क्लूँ ह्राँ ह्रीँ ह्रूँ सः वं आपदुद्धारणाय नमः हृदयाय नमः।

